[illegible] 42

[illegible]

[illegible] 43

[illegible] [1] [illegible]

[illegible]

[illegible] 44

[illegible]

[illegible] [2] [illegible] 45 [illegible]

[illegible] 46 [illegible]

[illegible] 47 [illegible]

[illegible]

---

39 एकंच तत् यत् ब्रुवंति यत् समग्रं शुभं अन्यायश्च पृथिव्यां इज्जदात् ॥ 40 एकंच तत् यत् ब्रुवंति यत् समग्रं शुभं पृथिव्याः आशाच आत्मशुद्धौ इज्जदात् ॥ 41 समग्रश्च अन्यायस्तनोः भयंच आत्मनः आहर्म्मनहेतोः ॥ 42 सर्व्वेऽपि विभक्तित्वात् अनयोर्द्वयोर्मूलयोः खंडं खंडं भेदं भेदं प्रसारिताः संति ॥ ॥

43 इहाहं सर्व्वेषु स्थानेषु इज्जदपरिज्ञानेन यथा उपरि समालिखितं उष्णतरमनः संशोधनतया अस्य दीनेः कामस्यच प्रष्टा समभवं ॥ 44 इत्येवं संशोधनाय द्वीपे हिंदूस्थाने भूमौच बहुषु विभिन्नजातिषु पर्यटितोऽहं ॥ 45 यतोऽहं दीनिं न तां या पारंपर्येण मैत्री चकार ॥ 46 किंतु तां अभीप्सां या[3] बुद्ध्या साक्षितयाच विवेकितरा प्रतिकरणीयतरा ॥ 47 संसर्गत्वे प्रभूतानां विभिन्नजातीनां[4] गतोऽहं ॥

---

[1] Ch. i, 36, 37. [2] JJ, JE [illegible]. [3] So JJ; AK, JE अभीप्सया. [4] AK om. वि.

48 यावत् एकवारं ॥ 49 यदहं तस्याः स्वामिनो रक्षायाः दीनेः उत्तमायाः शक्तेः श्रियश्च प्राणाच्च प्रभूतेभ्यो दुष्टागमेभ्यः तमस्विभ्यः संदिग्धेभ्यो दुष्टविचारेभ्यः शुद्धोऽभूवं ॥ 50 सर्व्वप्राणात् दीनिज्ञानस्य ॥ 51 प्रबंधसमालोचाच्च ज्ञानिनां ॥ 52 महादुष्टांतेभ्यः प्रबंधेभ्यो निर्व्वाणज्ञस्य आदरपादिआवंदस्य ॥ 53 तस्माच्च निबंधात् यः कृतो हूफरवर्हेन रोशनेन आदरफरोबगपुत्रेण ॥ 54 यस्य निर्म्मलनिबंधः इति नाम निहितं ॥ 55 तस्माच्च योऽस्य अग्रनिर्व्वाणज्ञस्य मुक्तात्मनः आदरफरोबगस्य फ्रोपजादपुत्रस्य ॥ 56 उत्तमदीनिमतामग्रेसरस्य ॥ 57 दीनेर्विविच्य दीनिकर्हनिबंधः इति नाम निहितं ॥ 58 शुद्धोऽभूवं बहुभ्यः संदेहेभ्योऽजयेभ्यः छन्नभ्यो दुष्टत्वेभ्यो दर्शनानां ॥ 59 नामांकिताच्च तस्मात् यत् विप्रतारकाणां महत्तरस्य मुख्यतरस्य दुष्टशिक्षातरस्य गुरोः मस्तग्गमानस्य ॥ 60 यस्य दर्शनं राक्षसीयं दीनिश्च विप्रतारका शिक्षाच विदुष्टा वेषश्च गुप्तप्रचारी ॥ ॥

---

[1] Better insert ۰. [2] AK, PB3, MH19 ; but see S.

61 सुनिश्चिती यातोऽहं[3] तेन बुद्धिप्राणेन दीनिज्ञानबलेन ॥ 62 नच निविडप्रवाहतया किंतु निर्म्मलया भिन्नदेवया[4] दीन्या होर्म्मिज्दन्यायिन्या ॥ 63 यां दाता होर्म्मिज्दः पुण्यात्मने जरथुस्त्राय समाख्यादयत् ॥ 64 जरथुस्त्रश्च सत्यदूततया एकाकी द्वारे कलावतो राज्ञो गुस्तास्पस्य समाजगाम ॥ 65 असौच बलवत्या जिह्वया बुद्धिसाक्षितया हस्तोपरिविन्यस्ततया ससीमवाक्यतया बहुसंदेहविभेदनतया अभिशास्त्रिंतानां परिस्फुटसाक्षिदातृतया दीनिं राज्ञो गुस्तास्पस्य निर्व्वाणज्ञानिनांच समाख्यादयत् समं प्रभूतमहस्त्वेन ॥ 66 महस्त्वंच अंतः शक्रेः शरीरिणां न विध्वस्तं येऽस्य गाढतरां वृद्धिं ददृशुः ॥ 67 राजा स्युदाख्तो[5] जरगरश्च अपरेच द्वीपीयाः बहुषु युद्धावलंबेषु रक्तप्रवाहेषु जातेषु[6] दीनिं एतस्मात् प्रत्यकुर्व्वन् ॥ 68 यावच्च ऋमस्थानं

---

[1] Pl. in MH19. [2] JJ, JE add ॰. [3] ज्ञानतया wanting. [4] JJ, JE prefix वि. [5] S always घ्त for ख्त. [6] All यातेषु.

[illegible]

हिंदूस्थानं[5] द्वीपे दीनेः प्रवृत्तिकारितायै पर्यटिताः संति ॥ 69 अनंतरंच आम्नायेन महत्सु राजसु राजबीजेषु क्रियावत्सु संप्राप्ता ॥ 70 यावच्च यावच्च महादिव्यं यत् उत्तमधातुना उपरि हृदये रेचितेन अस्य हूफरवर्हस्य आदरपादस्य मारस्यिंदानपुत्रस्य अंतः राज्ये अस्य दातुः साहपूरस्य राज्ञां राज्ञो होर्म्मिज्दपुत्रस्य संवादेन समं प्रभूतजातिभिः विभिन्नजातीयैः आश्मोगैः ॥ 71 तेभ्यो मुख्यतमेभ्यः आश्मोगेभ्यो ये अभीप्सुभिः आकारिताः संति शुद्धश्च ॥ ॥

72 रूमीयाश्च ये युगे युगे नास्तिकनामानो याताः संति बहून् प्रश्नान् दुष्टविचारान् एतस्याः दीनेः पप्रच्छुः ॥ 73 नाभूत् कस्मिनपि प्रश्ने भ्रांतिः यः[6] एतस्याः दीनेः विभेदितः[6] ॥ 74 निर्व्वीराज्ञाश्च एरांनगराणां सदैव अंतस्तेषां विजयधर्व्वारो बभूवुः ॥ 75 न यथा अपरे दर्शनीयाः येषां दीनिः

---

[1] All ℵ|ℵ‴ⱷ; but compare ⱷⱷ in § 70. [2] All have ›ⱷ for ‴ⱷ. [3] All om. ℵ. [4] JE ⱷ‴ⱷⱷ‴. [5] बहिर् seems wanting. [6] So all.

गुह्यप्रचारतया विप्रतारकतया विप्रतारितानांच विमोहकारितया असत्कार्यतया अंतः वर्गेषु वृंदेषु किंचिज्ज्ञानां[4] अप्रबुद्धानां देवरूपिणां येषु ज्ञानात् बुद्धेश्च अवबोधाच्च कापि परिचितिर्न बभूव ॥ 76 ततश्च कियतांचित् वृंदो यो बहुगुह्यतया विप्रतारितो विमोहितः ततुं प्रकटत्वे न ददौ ॥ 77 पश्चात् प्रभूतेभ्यश्च समुदायः किंचिज्ज्ञानो[5]ऽपरिचितन्यायोऽमीभिः विप्रतारितः परिस्फुटो बभूव समं बह्वबद्धवाक्यतया अनृततया विभिन्नतया एतेषां दर्शनस्य ॥ 78 यथा बह्वबद्धत्वात् विभिन्नत्वात् न्यायपरिचितये नूतनशिक्षावश्योऽत्र चिह्नयामः ॥ 79 तस्मात् हेतोः यत् निबंधान् निर्व्हाणज्ञानां पूर्व्हपुरुषाणां प्राप्तवारीकैः[6] दारमीयैः[6] दुष्टज्ञानत्वे वाचितान् उत्तमज्ञानत्वे प्रतिपादनाय ॥ 80 सुलोचनतया समादिष्टं पश्येत ॥ ॥

---

[1] Perhaps › wanting, to agree with S. [2] JE adds to agree with S. [3] All . [4] JJ, JE किंचित्ज्ञानां; AK om. ज्ञ. [5] All किंचित्ज्ञानः. [6] Nêr.'s transcription of his own imperfect Pz.

CHAPTER XI.

[illegible]

CHAPTER XI.

1 इतः संलिखामोऽवद्धत्वं एतेषां प्रलापस्य सत्यनिरीक्षणत्वंच ॥ 2 अहो पश्येत तेन ज्ञानलोचनेन ॥ 3 आदौ अमून् ये एकमूलास्पदसमालोचिनः ॥ 4 येच प्रलपंति यत् एकोऽस्ति इश्वजदो यः पुण्यकरो ज्ञानी शक्तिमान् रक्षकः क्षमापरश्च ॥ 5 यत् पुण्यं पापं सत्यं अनृतं जीवितं मरणंच उत्तमत्वंच निकृष्टत्वंच सर्व्वं एतस्मात् ॥ ॥

6 इह एतेभ्यः पृच्छेत ॥ 7 यत् इश्वजदः सदैव रक्षकः क्षमापरः पुण्यकरो न्यायी सर्व्वं वर्त्तमानं अतीतं भाव्यंच वेत्ति सकलेन केनचित् कामेन कामचरः तत् क्व न्यायत्वं माध्यस्थं अथवा यत् एवं एवं नो ॥ 8 यतश्चेत् रक्षकः पुण्यकरः क्षमापरश्च ततः आहर्म्मनं

---

[1] JE inserts [illegible] to agree with S. [2] Pl.-Pz. in AK.



देवान् नरकंच एनं सकलमपि निकृष्टमाम्नायं स्वीयया रक्षया पुण्यकारितया क्षमापरतया स्वीयासु सृष्टिषु किमिति अवाकिरत् ॥ 9 चेत् न विज्ञातवान् ततोऽस्य ज्ञानत्वं सर्व्वावबोधत्वं कुतः ॥ 10 चेत् न समीहितवान् अन्यायं निकृष्टत्वंच सृष्टिभ्यो विना कर्त्तुं सर्व्वस्मै कस्मैचित् केवलं शुभं दातुं ततोऽस्य न्यायत्वं माध्यस्थं कुतः ॥ 11 चेत् नाशक्नोत् यत् न दत्तमास्ते ततोऽस्य सर्व्वशक्तित्वं कस्मात् ॥ 12 यत् सर्व्वं यथा निरीक्षामहे समालोचामः ॥ ॥

13 सदैव यदि सर्व्वं शुभं अन्यायंच इञ्जदात् यातं वदंति ततश्चेत् अमून् चतुरो गुणान् ये इञ्जदत्वेन अंतः संयुज्यते यदस्ति सर्व्वज्ञानत्वं सर्व्वशक्तित्वं उत्तमत्वं क्षमावत्त्वं एतस्मात् पृथक् कुर्व्वंति ॥ 14 अन्यथा उपायो नास्ति ॥ 15 चेच्च एकमपि एतेभ्यः चतुर्भ्यो गुणेभ्यः एतस्मात् पृथक् कुर्व्वंति तथापि इञ्जदत्वेन न संपूर्णः ॥ 16 यतश्चेत्

---

[1] AK, MH19 ›. [2] So K28, S; but in AK, MH19, JJ, JE both verbs end with ✱›, which may, perhaps, stand for Pl. ✱ of 3rd person optative. [3] All om.

इन्नजदः स भवति यः सर्व्वज्ञानी सर्व्वशक्तिश्च उत्तमश्च क्षमापरश्च ततोऽसौ यो न सर्व्वज्ञानी न सर्व्वशक्तिः नोत्तमो न क्षमापरो न इन्नजदः ॥ ॥

17 द्वितीयंच इदं यत् चेत् सर्व्वेषु केषुचित् पदार्थेषुच कामचरः स्वामी ततोऽसौ नगरं राज्यंच स्वीयं समग्रेभ्यः शत्रुभ्यः प्रतिघातेभ्यो ये स्वीयात् कर्म्मणः किमिति एवं निरूपायं न दधौ यत् कस्यापि अंतः राज्ये कोऽपि उपद्रवो बलात्कारोऽन्यायश्च आक्रंदश्च न भवेत् ॥ 18 यतः स्वामी राजाच नरः स्वामित्वे राज्येच ततः क्षाध्यो यदि स्वीयं नगरं राज्यंच स्वीयया बुद्धा एवं पातुं धर्त्तुंच क्षमो यथा स्वीयात् कर्म्मणः शत्रवः कदर्थयितुं पापं हानिंच कर्त्तुं न समर्थीयंति ॥ 19 अथचेत् स्वीयात् कर्म्मणो दुष्टान् क्षीणयति ततोऽसौ स्वतो मनोमित्रान् विना निधाय सर्व्वं कमपि निरुपद्रवं कर्त्तुं समर्थीयति ॥ ॥

---

20 द्वितीयंच इदं यत् चेत् अधिकशक्तिः बलिष्ठः प्रधानतरः ॥ 21 ततोऽस्य अधिकशक्तित्वं बलिष्ठत्वं प्रधानत्वं उपरि कस्मिन् ॥ 22 यतोऽधिकशक्तित्वं बलिष्ठत्वं उपरि शत्रुषु प्रतिद्वंद्वि भवति ॥ 23 प्रतिद्वंद्वी शत्रुश्च स्वयं न स्वीये संयुज्यते[5] भवितुं ॥ 24 यावत् चेत् शत्रुः प्रतिपक्षो नास्ति कस्योपरि अधिकशक्तिः बलिष्ठश्च भवति ॥ 25 ततोऽस्य अधिकशक्तित्वं बलिष्ठत्वं उपरि न समुदीर्यें ॥ 26 यतः उपरि स्वीये वपुषि गावः पशवश्च येषां प्रतिपक्षो विरोधी नास्ति बलिष्ठाः अधिकशक्तयः संति ॥ ॥

27 द्वितीयंच इदं यत् इज्जदत्वेन महत्त्वेन निजेन ज्ञानी संतोषी किंवा नो ॥ 28 चेत् ज्ञानी संतोषी ततो निजेन ज्ञानेन कामेन शत्रून् पापकर्म्मिणः कुर्व्वन् समग्रानपि नगरांतः विध्वंसिनो ऽवकिरन् शुभेन नगरस्य सृष्टीणांच संतोषी बभूव ॥ 29 पापं अन्यायंच स्वामाकांक्षा

---

[1] K28 adds , and JE , having misunderstood AK's correction in S.

[2] So all, but S indicates .

[3] K28, JJ, JE insert .

[4] K28 inserts .

[5] Interlined above शक्नोति, as a *correction*, in AK; JJ, JE, taking it as an *insertion*, add शक्नोति in the text.

स्वयंच उपर्येषां शत्रोः शापकरस्य संजातस्य अस्य मनुष्यान् अन्यायरतान् नरकीयान् कर्तुं कथं संयुज्यते ॥ ॥

30 द्वितीयंच इदं किल सर्व्वं यत् वक्ति सत्यतया शुद्धंच वक्ति किंवा नो ॥ 31 चेत् सत्यतया शुद्धंच वक्ति तच्च यत् वक्ति किल पुण्ये मित्रः पापे शत्रुरस्ति ॥ 32 सदैव पापं पापकर्म्मिभ्यः प्रभूतं ददाति पुण्येभ्यः पुण्यकर्म्मिणां ॥ 33 ततोऽस्य सत्या वाक् छ ॥ ॥

34 द्वितीयंच इदं यदस्य कामो निकृष्टत्वे किंवा उत्तमत्वे ॥ 35 चेत् अस्य कामो निकृष्टत्वे ततोऽस्य इत्रजदत्वं कुतः ॥ 36 चेत् कामः उत्तमत्वे ततः किमिति निकृष्टाः निकृष्टताश्च प्रभूताः संति उत्तमेभ्यः उत्तमताभ्यश्च ॥ ॥

37 द्वितीयंच इदं यत् क्षमाधरोऽस्ति किंवा नो ॥ 38 चेत् न क्षमाकरः ततोऽस्य इत्रजदत्वं कुतः ॥ 39 अथ चेत् क्षमाकरः ततः किमिति

---

[1] So all; perhaps ... or ...; S indicates ... [2] These two words change places in S, which suits the context better. [3] Alp. ...

[illegible]

वक्ति यदहं हृदयं श्रोत्रं लोचनेच मनुष्याणां[3] विमुद्रितवान् यथैते न शक्नुवंति श्रवमंतुं वक्तुं कर्त्तुंच विना तेन यन्मे रोचते ॥ 40 संति केचित् अनिम्नत्वेन महाढ्याः कृताः ॥ 41 संति केचित् प्रचुरप्रकारेण मृत्युना निहताः अवशीर्णाः नरकेच दीर्घकालं निक्षिप्ताः ॥ 42 किल यावत् ते यान् पृथक् करोमि सुंदरं पुण्यकारितराः भवंति ॥ 43 इह तेच ये पृथक् कृताः पुनः अपकारं कुर्व्वंति ॥ 44 तस्मात् प्राक्तनीयात् प्रचुरं दोषकरतराः पापकारितराश्च संति ॥ ॥

45 द्वितीयंच इदं चेत् सर्व्वं यत् कुरुते ज्ञानतया कारणेनच कुरुते ॥ 46 ततश्चेत् कोऽपि प्रतिपक्षः प्रतिघातो नाभूत् किमिति सृष्टयः प्राक्तनीयाः याः समारचिताः समाराधकाः देवीये अकृतादेशत्वे यदंतः मनुष्येषु दुर्गतित्वे नरकीये विपर्ययिताः संति ॥ 47 अथ चेत् असौ न विज्ञातवान् यत् विपर्ययिष्यंति ततोऽस्य कार्यं विमृश्य संयुज्यते समादेष्टुं ॥ 48 यत इह बहवः

---

[1] All [illegible]; but corrected in JE. [2] Better [illegible]. [3] All मनुष्यां.

[illegible]

सहस्रधाच लक्षधाच ये विनिर्म्मिताः किल अर्च्चयिष्यंति तेच राज्येन माद्यंति सर्व्वेऽपि अकृतादेशाः अशुभोपदेष्टारः संयाताः संति ॥ 49 यतः समं तेन किंचिज्ज्ञानेन येन मनुष्यो न एवं समारच्यते विनिर्म्मीयते यथा मनुष्यस्य कामः ॥ 50 अथ चेत् भविष्यति किंचित् यत् समारचिष्यति निर्म्मास्यति यत् न एवं उपरि आयाति भवति यथैषां कामः द्वितीयेच पुनः समारचने तस्य कस्यचित् न स्थास्यति तस्माच्च रक्षिष्यति ॥ ॥

51 तदसौ स्वामी सर्व्वशक्तिः सर्व्वज्ञानी यावत् इदानीं बहून् असंख्यान् कांश्चित्[3] आरचत्[4] एकोऽपि न एवं उपरि आयाति भवति यथास्य[5] कामः तथापि आरचनात् दानात् नवनवस्य सदैव न परिरक्षति[6] ॥ 52 यथा यदि तान् प्राक्तनीयान् गणान् दाता प्रियत्वाय पावकात् समारचत्[7] कियंतिचित् वर्षसहस्राणि ॥ 53 यत् यथा वदंति

[1] AK, MH19 [illegible]; but see S and § 51. [2] S om. [3] All कान् चित्. [4] So all always (see §§ 52, 65, 197; ch. xii, 15; xiii, 12, 92, 121, 141); possibly for आरारचत्, but compare §§ 50, 93, 221; ch. i, 44; xii, 74; xiv, 36, 70. [5] AK यथाऽस्य. [6] All परिरक्षति. [7] So all.

[illegible]

किल पूजा अस्य सदैव चक्रिरे ॥ 54 निदाने एकेनैव आदेशेन अकृतेन यं ददौ यत् प्रणामं एतस्मै मनुष्याय प्राक्तनाय अस्माभिः कर्हमात् समारचिताय कुरुत ॥ 55 असौ शुद्धिं अयोग्यकरणेन किमित्यवोचत् ॥ 56 ततश्च कर्हमेन शापेन कोपेन हीनान् लघून् चकार ॥ 57 देवत्वे दूरत्वेच व्यावर्त्तयत् स्वर्गलोकाच्च बहिश्चकार ॥ 58 सहस्रतयाच जीवितं राज्यं दीर्घकालं ददौ ॥ 59 यत् प्रयामि दासान् आराधकान् मे अमार्गिणो विमोहितान् करोमि ॥ 60 असौ स्त्रीये कामे विरोधिनः प्रतिद्वंद्विनः चक्रे ॥ ॥

61 निर्द्वीणेच तस्य नरस्य यः प्रियत्वाय हितत्वाय अस्याराधको महान् समं बहुभिः आराधकैः प्रणामं कृतवान् समादिदेश ॥ 62 उद्यानेच स्वर्गभुवनस्य चक्रे ॥ 63 यत् विचरेः समग्राणिच फलानि भक्षेः ॥ 64 विना तेनैकेन वृक्षेण यः

[illegible]

[1] AK, MH19 om. [illegible]. [2] K28, JJ, JE [illegible], but corrected in JE. [3] All [illegible]. [4] Ends with [illegible] in all. [5] MH19 om.

[illegible]

समादिष्टो यत् मा भक्षेः ॥ 65 असौ समं तैश्च विप्रतारयितारं विमोहयितारंच समारुचत्[2] ॥ 66 अंतश्च उद्याने सन्निहितवान् ॥ 67 यं कश्चित् सर्प्पं वक्ति कश्चित् आहर्म्मनं ॥ 68 असौ रूपंच खादनतायाः तृष्णायाः सङ्गं स्वयं एतस्मै मनुष्याय ददौ ॥ 69 पश्चात् तेन विमोहकर्त्रा विप्रतारिताः यत् तस्मात् वृक्षात् भक्षेत ॥ 70 अस्ति कश्चित् आदमं वक्ति ॥ 71 तेच तेन रूपेण खादनतायाः अखादन् ॥ 72 पश्चात् खादनात् एवं ज्ञानवंतो बभूवुः यदेतैः उत्तमं निकृष्टंच अवलोकितं परिज्ञातंच ॥ 73 तस्माच्च एवं प्रियत्वात् वात्सल्यात् तेनैकेनादेशेन ते विस्मृताः ॥ 74 तस्याश्च विस्मृतेः सङ्गं एतस्मात् कारणं ॥ 75 समं कलत्रैरमून् महाक्रोधेन अप्रियत्वेन स्वर्गोद्यानात् बहिश्चकार ॥ 76 हस्तेचास्य दुष्टमनसो विप्रतारकस्य विमोहकस्य समर्प्पितवान् ॥ 77 यदेषां कामः स्वीय उपरि प्रचारितः उपर्येषांच कारितः ॥ ॥

[1] All om. [2] So all.

78 ननु किमस्ति अन्यायत्वं निःकारणादेशत्वं अनुतापिबुद्धित्वं किंचिज्ज्ञानत्वं[3] यदेतस्मात् निकृष्टतरं अन्यायितरंच ॥ 79 इदंच यत् तत् उद्यानं किमिति एवं सुप्राकारं सुदक्षतरंच न चकार यत् स विमोहनाकरः अंतर्नागमिष्यत् ॥ 80 ननुच बहून् दासान् अर्च्चनाकरान् असौ विमुग्धान् चक्रे करोतिच ॥ 81 असौ तेन हेतुना प्रचुरान् आचार्यान् विदग्धान् युगे युगे जगति असृजत् ॥ 82 यत् दासान् मे हस्तात् अस्य विमोहयितुः शोधयंति ॥ 83 मार्गे प्रवाहेच सत्ये समानयंति ॥ 84 असौ तानपि अर्च्चकान् आचार्यान् स्वीयान् ये सत्कार्यत्वं मनुष्यंच मार्गे शिक्षायांच सदाचारिण्यां समानीतवंतः समग्रानपि निजेच्छया निकृष्टेन मृत्युना निजघान ननाशच ॥ 85 स यः आद्यो विमोहयिता अमार्गनेता अनंतकालं जीवन् विनिर्मुक्तः आस्ते ॥ 86 यावच्च इदानीं कामोऽस्य विमोह-

[1] Ends with • in all, but see S. [2] So all, but S neglects it. [3] All have always तज्ञा for ज्ञा.

नतया अमार्गेनयनतया अधिकशक्तितरः कामचरतरश्च तस्मात् यः इअजदस्य ॥ 87 यतो विमुग्धाः अमार्गिणः प्रभूताः स्फीततराः संति सत्यमार्गिभ्योऽमुग्धेभ्यः ॥ ॥

88 द्वितीयंच इदं किल सर्व्वं यत् कुरुते कारणेन कुरुते किंवा नो ॥ 89 चेत् अकारणं कुरुते पिशाचकर्म्मा ॥ 90 असौच यः पिशाचकर्म्मा इअजदत्वेन निर्व्वाणज्ञेन न युज्यते स्तोतुं ॥ 91 चेत् कारणेन कुरुते ॥ 92 ततश्चेत् अस्य कोऽपि प्रतिपक्षः प्रतिद्वंद्वी नाभूत् अस्याः समग्रायाः सृष्टेः या यथा देवाश्च मनुष्याश्च ये अकृतादेशाः प्रत्यभिमुखं कामस्यास्य योद्धारो विमोहयितारः असंख्यायाश्च सृष्टेः अलाभवत्याः आरचनेन किं ॥ ॥

93 द्वितीयंच इदं यत् चेत् सर्व्वं वर्त्तमानं अतीतं भाव्यंच वेत्ति तदस्य न युज्यते निजेन ज्ञानेन कामेनच किंचिदपि आरचितुं[2] यस्मात् पश्चात्तापः प्रतिकूलंचास्य कामस्य आदेशस्यच आस्ते ॥ 94 अस्यच आचार्याणां कामकर्त्तॄणां प्रतिघाति भवति ॥ 95 चेत् ब्रुवंति

[1] MH19 ब्रुवंति. [2] So all.

[illegible]

[illegible] 96 [illegible]

[illegible] 97 [illegible]

[illegible] 98 [illegible]

[illegible] 99 [illegible]

[illegible] 100 [illegible]

[illegible] 101 [illegible] 102 [illegible]

[illegible] 103 [illegible]

यत् इदं प्रतिद्वंद्वि मूलात् उत्तमं शुभंच समारचितं पश्चात् निकृष्टत्वे सृष्टीनां अमार्गीकारित्वे व्यत्ययितं ॥ 96 तदिदं प्रतिवदेत यत् चेत् असौ सर्व्वेशक्तिः किमिति कामः प्रतिद्वंद्विनः व्यत्ययेन निकृष्टत्वे सृष्टीनां अमार्गीकारित्वे बलिष्ठतरः प्रधानतरश्च तस्मात् यः इञ्जदस्य ॥ 97 किमिति निकृष्टत्वं अंतर्युगे बलिष्ठतरं उत्तमत्वात् ॥ ॥

98 द्वितीयंच इदं यत् चेत् पापकर्म्मिणः सर्व्वेऽपि कामेनास्य ॥ 99 असौ मनः पापकर्म्मिणां स्वयं व्यामोहयत् ॥ 100 असौ बीजं पापस्य स्वयं ववाप[5] ॥ 101 चेत् समारूढं कस्य मूले दधौ ॥ 102 एकेच[6] निहताः एकेच[6] प्रसादपूरिताः कस्मात् प्राणात् न्यायमत्तायाः ॥ ॥

103 द्वितीयंच इदं यदसौ एनां[5] भूविभूतिं कारणेन आनंदाय निजाय समाधानाय शुभायच मनुष्याणां चक्रे ददौच किंवा निःकारणं विषादाय[7] निजाय

---

[1] All ›, but see S. [2] So all and S; perhaps ‹ is better. [3] So all, but S indicates ۶۰۲. [4] JJ, JE, S ۳۶. So all. All एकाश्च. [7] AK has खा for घा.

[illegible]

उद्वेगाय अशुद्धये दुःखाय मरणायच मनुष्याणां ॥ 104 यतः चेत असौ निःकारणं चक्रे पिशाचकार्यो ॥ 105 निःकारणं किंचित् ज्ञानिनां अप्रतिकरणत्वात् ॥ 106 चेत् कारणेन चक्रे असौ आनंदाय निजाय समाधानाय शुभायच मनुष्याणां ददौ ॥ 107 ततोऽसौ सुनिवासां[1] संपूर्णशुभां[1] किमिति नाकरोत् ॥ 108 चेत् अस्य समारचनात् मनुष्याणां सृष्टेश्च आनंदः शुभंच ततोऽस्य अपघातात् विध्वंसात् लाभः कः ॥ 109 चेत् असौ मनः पापि न स्वयं मनुष्येषु ददौ ततः कोऽस्ति यः ऋते आदेशात् कामाच्च अस्य मनः पापि ददाति ॥ 110 चेत् असौ स्वयं ददौ अमीषामिह दोषं उपरि दधाति ततोऽस्य सत्यं माध्यस्थं कुतः ॥ 111 यतो यद्यपि मनुष्याः समं किंचिज्ज्ञानेन किंचिद्बुद्धा तथापि व्याघ्रान् विरून्[2] अपरांश्च क्षुद्रजंतून् यावदेते समर्थाः डिंभेषु गोस्थानेषु निजेषु अंतर्न निक्षिप्यंति ॥

[1] So all. [2] Guj. *varu.*

112 ... 113 ... [1] ... 114 ... [2] ... [3] ... 115 ... 116 ... 117 ... 118 ... 119 ... 120 ... 121 ... [4] ... [5]

112 नो चेत् एते विनाशयंति ॥ 113 ननु इञ्जदश्च पालनाकरः आहर्म्मनं देवान् स्त्रीयासु सृष्टिषु किमिति मध्ये निचिक्षेप ॥ 114 यदेनां अश्रोत्रीं व्यामुग्धां दुर्गतिनीं नरकीयांच चक्रिरे ॥ 115 चेत् विमर्शनाय चक्रे यथा तत् यत् ब्रुवंति यदसौ अशुभं विमर्शनाय उपरि सृष्टीनां ददौ ॥ 116 तदसौ पूर्व्वं तस्मात् मनुष्यान् सृष्टिंच किं न विज्ञातवान् ॥ 117 किमसौ आचार्यो विमर्शकः सर्व्वज्ञानी अनाकार्यः ॥ ॥

118 संक्षेपात् इदं यत् इञ्जदस्य चेत् कोऽपि प्रतिपक्षः प्रतिघाती नाभूत् ततोऽसौ अनुपद्रवतया समग्रां सृष्टिं दातिंच दातुं शक्तोऽभूत् किमिति न ददौ ॥ 119 [6]चेत् समीहितवान् न शक्तोऽभूत् ॥ 120 चेत् समीहितवान् नच शक्तवान् नच संपूर्णशक्तिः ॥ 121 अथ चेत् असौ शक्तवान् न समीहितवान् नच पालनाकरः ॥

[1] Ends with ... in JJ, JE. [2] All om. [3] Written, as a correction, above ... in AK, and added to that word in MH19. [4] JE adds ... [5] So all; the suffix is probably not adverbial, but the conditional verb for Pl. ... (Pz. ...). [6] अथ seems wanting.

122 चेत् असौ विज्ञातवान् यत् अस्याः सृष्टेः दातेश्च यां ददामि किंचित् भविष्यति यत् न अंतः कामे मम ॥ 123 निदाने तु चकार ॥ 124 तन्ननु अयं सकलोऽपि असंतुष्या निजेन करणेन प्रवर्त्तनेन कोपः शापश्च निक्षेपश्च यो निग्रहे नरकस्य निःकारणः ॥ ॥

125 द्वितीयंच इदं यच्चेत् समग्रं पापमनसा पापकर्म्मणा पापं यत् मनुष्याः मन्यंते ब्रुवंति कुर्व्वंतिच एवंच दुःखं मांद्यं दौष्ट्यं निग्रहोऽन्यायश्च नरकस्य विना कामेन आदेशेनच इञ्जदस्य भवितुं न शक्नोति ॥ 126 इञ्जदस्य कामः शक्तो नित्यश्च ॥ 127 यतोऽसौ स्वयंच नित्यः ॥ 128 इह कस्यापि नित्यात् अन्यायात् निग्रहात् शोद्धुं अनाशा[3] सुनिश्चिता एव ॥ 129 यतः प्राचुर्येण प्रकटं यत् कोऽपि विद्याधिपतिः प्रवीणश्च नास्ति यः[4] एतस्मात् अन्यायात् निकृष्टकामत्वात् अन्यथा दधाति ॥ 130 चेत् आराधितः

[1] S om. [2] AK, MH19 ७२; but see S. [3] So AK; better अनाशता.
[4] AK om.

ततं प्रतिम एव तेषां आराधकानां आचार्याणां ये मनुष्येषु निरोपं इदं चक्रिरे यत् दोषं पापंच मा कुर्यात ॥ 131 यतः कामं आदेशंच इच्छजदस्य प्रतिखलितुं कामयंति ॥ 132 इदंच यत् यथास्य द्वेऽपि कामः सकलंच पापं सकलंच पुण्यं न प्रकटं यत् पुण्यं पुण्यकर्म्मिणां प्रभूतं प्रतिकरोति किंवा पापं पापकर्म्मिणां ॥ ॥

133 ननु तेच वैद्याः ये आशायै आत्मनो रोगिणां औषधानि विदधते[3] ॥ 134 अमीषां दुःखं मांद्यं प्रतिखलंति प्रेरंतिच ॥ 135 यत्तेषां तस्मात् कर्म्मणः पुण्यं स्त्रीयायते ॥ 136 परं निग्रहे नरकस्य निःसंदिग्धं तिष्ठंति ॥ 137 तेच ये आत्मनो वाञ्छभ्याय दुर्बलेभ्यो नास्तिकेभ्यो दुःखितेभ्यो मनुष्येभ्यः किंचित् ददति ॥ 138 तेषां नास्तिकं दौर्बल्यं तेभ्योऽपहरंति प्रेरंतिच ॥ 139 यत्तेषां तस्मात् कर्म्मणः पुण्यं स्त्रीयायते ॥ 140 परमेषां पापं भारितरं भवति निश्चयेन ॥ 141 चेत् वदंति यत् तेच वैद्याः

[1] JJ, JE insert ›. [2] All but JJ om.; but see S. [3] Always विदधते.

औषधानि ये विदधते तेच ये दुर्बलेभ्यो दुःखितेभ्यः किंचित् ददति सर्व्वेऽपि कामेन इञ्जदस्य ॥ 142 तच्चेत् इञ्जदोऽप्रतिघाती अप्रतिपक्षः ततोऽस्य मांद्यस्य दौर्बल्यस्यच अदानं समाधानितरं सकारणतरं इञ्जदत्वेच अनुरूपितरं ॥ 143 तस्मात् यदमून् स्वयं रोगिणो दुर्बलान् कृत्वा मनुष्येषु समादिदेश यत् यूयं एतामेतान्[6] अरोग्यान् अपनास्तिक्यान् कुर्यात ॥ 144 चेत् वदंति यदस्य कामोऽयं यत् तेषां वैद्यानां दातॄणां तेन प्रसाददानेन शुभं तेभ्यः तत्र कुरुते ॥ 145 एतांश्च स्वर्गशुभेषु अनंतकालीयेषु प्रापयति ॥ 146 तदेतत् पश्येत यत् कथं अन्यायी अशक्तश्च यत् शुभं प्रभूतत्वंच उपरि अन्यस्मिन् संपूर्णकामे याते सति प्रभूतान् अपापान् उपद्रुतान् दुर्बलान् नास्तिकान् रोगिणोऽन्यायागतान्[7] कुरुते ॥ 147 इदंच यत् चेत् शुभं प्रभूतत्वं उपरि एकस्मिन् विना उपद्रवेण दुःखेन कष्टेनच अपरस्य कर्त्तुं न शक्नोति ॥ 148 ततोऽसौ शक्तिकर्त्तायाः

---

[1] MH19 [illegible]. [2] MH19 [illegible]. [3] MH19 [illegible]; JJ [illegible]. [4] All [illegible], but see S. [5] JJ [illegible]. [6] So all. [7] So both; perhaps for [illegible].

कामकारितायाः अप्रतिपक्षतायाः अननुरूपः ॥ 149 चेत् वदंति यत् तान् रोगिणो दुर्बलान् परलोकीयेन तेन प्रसाददानेन स्वर्गैशुभेषु अनंतकालीयेन प्रापयति ॥ 150 तच्चेत् असौ प्रसाददानं यत् परलोकेन विना अन्यायेन इहलोकस्य दातुं न शक्नः नच संपूर्णशक्तिः ॥ 151 इदंच यदस्य उपद्रवकारित्वं यत् इहलोकेन निःसंदिग्धं प्राक् प्राप्तं निःकारणंच ॥ 152 प्रसाददानंच यत् परलोकस्य संदिग्धं अप्रतिकरणीयंच[1] पश्चात् उपद्रवकारित्वात् ॥ 153 यथा उपद्रवः आद्यो निःकारणः प्रसाददानं[2] यत् पाश्चात्यं सकलमपि निःकारणतया ग्रहिलतयाच ॥ 154 इदंच यत् किमपि ऋद्धत्वं पाश्चात्यं उपद्रवे आद्ये निःकारणतया नावलोक्यते ॥ ॥

155 द्वितीयंच इदं यत् एतेभ्यः त्रिभ्यः प्रकारेभ्यः एकस्यापि भवितुं अनुपायः ॥ 156 एकंच किल[3] यत् किंचित् अंतरस्मिन् जगति वर्त्तमानं अतीतं भाव्यं सकलमपि कामेनास्य किंवा नो ॥ 157 अथवा अस्ति यदस्य कामेन अस्ति यत् नो ॥

---

[1] JJ om. च. [2] JE adds च. [3] So both; perhaps for एकं सकलं.



158 यथा किंचिदपि नावलोक्यते यत् न शुभं अथवा अशुभं अथवा सम्मिश्रं द्वाभ्यां ॥ 159 चेत् वदंति यदस्य समग्रमपि कामः ततोऽस्य शुभं अशुभंच द्वेऽपि कामः ॥ 160 चेत् अस्य शुभं अशुभंच द्वेऽपि कामः अपूर्णकामी ॥ 161 यतः एकेनापि न संपूर्णः ॥ 162 असौच अपूर्णकामी अपूर्णस्वयं शक्नोति भवितुं ॥ 163 यथा उपरि निदर्शितं ॥ 164 चेत् अस्य किमपि न कामः ॥ 165 कस्यापि कामस्य अभावात् नास्तिकामः ॥ 166 असौच यो नास्तिकामो रूपकर्म्मा ॥ 167 असौ यो रूपकर्म्मा रूपितश्च कृतश्च ॥ 168 चेत् अस्ति यदस्य कामः अस्ति यदस्य न कामः ॥ 169 किंचिदपि अंतर्जगति नावलोक्यते यत् न शुभं नच अशुभं ॥ 170 तच्चेत् इअजदस्य शुभं कामः ततोऽसौ[4] अशुभस्य अकामी परिस्फुट एव ॥ 171 तच्च यत् अशुभं न कामेनास्य ॥ 172 चेत् अस्य अशुभं कामः ततोऽसौ शुभस्य अकामी अनुमानेन ॥ 173 तच्च यत् शुभं न कामेनास्य ॥

[1] seems wanting, see S. [2] Compare ch. viii, 108–116. [3] MH19. [4] JJ inserts कामः.

174 ચેત્ તચ્ચ યત્ શુભં કામઃ ઇચ્છજદસ્ય તચ્ચ યત્ અશુભં અન્યકામાત્ સમુદ્ભૂતં પરિસ્ફુટમેવ ॥ 175 ચેત્ તત્ યત્ અશુભં કામોઽસ્ય તચ્ચ યત્ શુભં અન્યકામાત્ યાતં અનુમાનેન ॥ 176 અનુમાનતયા[2] એવ પ્રકટાયતે પ્રતિદ્વંદ્વી કામસ્ય ઇચ્છજદસ્ય ॥ ॥

177 ચેત્ અશુભં મનુષ્યાત્ પ્રભવતીતિ બ્રુવંતિ ॥ 178 તદ્યથા મનુષ્યો ન નિત્યઃ સ્વયં તત્ અનુમાનેનૈવ અથવા અશુભં પ્રાક્ મનુષ્યાત્ સમુદ્ભૂતં અથવા પશ્ચાત્ ॥ 179 અથવા સમં મનુષ્યેણ સમુત્પન્નં ॥ 180 ચેત્ પ્રાક્ મનુષ્યાત્ સમુદ્ભૂતં બ્રુવંતિ ॥ 181 તદ્યથા ઋતે ઇચ્છજદાત્ અન્યઃ કોઽપિ આરચિતા[3] દાતા નાભૂત્ ॥ 182 તત્ અશુભં અથ ઇચ્છજદો દદૌ અથવા સ્વં સ્વયં દદૌ અથવા સ્વયં સદૈવ અભૂત્ ॥ 183 ચેત્ પશ્ચાત્ મનુષ્યાત્ સંજાતં વદંતિ ॥ 184 તચ્ચેત્ રત્નં માનુષીયં સકલમપિ દાતિઃ ઇચ્છજદસ્ય ॥ 185 મનુષ્યસ્યચ અશુભં ઇચ્છજદઃ અંતઃ રત્ને ન દદૌ ॥ 186 કર્મ્મણા કથં રતસ્માત્

---

174 चेत् तच्च यत् शुभं कामः इच्छजदस्य तच्च यत् अशुभं अन्यकामात् समुद्भूतं परिस्फुटमेव ॥ 175 चेत् तत् यत् अशुभं कामोऽस्य तच्च यत् शुभं अन्यकामात् यातं अनुमानेन ॥ 176 अनुमानतया[2] एव प्रकटायते प्रतिद्वंद्वी कामस्य इच्छजदस्य ॥ ॥

177 चेत् अशुभं मनुष्यात् प्रभवतीति ब्रुवंति ॥ 178 तद्यथा मनुष्यो न नित्यः स्वयं तत् अनुमानेनैव अथवा अशुभं प्राक् मनुष्यात् समुद्भूतं अथवा पश्चात् ॥ 179 अथवा समं मनुष्येण समुत्पन्नं ॥ 180 चेत् प्राक् मनुष्यात् समुद्भूतं ब्रुवंति ॥ 181 तद्यथा ऋते इच्छजदात् अन्यः कोऽपि आरचिता[3] दाता नाभूत् ॥ 182 तत् अशुभं अथ इच्छजदो ददौ अथवा स्वं स्वयं ददौ अथवा स्वयं सदैव अभूत् ॥ 183 चेत् पश्चात् मनुष्यात् संजातं वदंति ॥ 184 तच्चेत् रत्नं मानुषीयं सकलमपि दातिः इच्छजदस्य ॥ 185 मनुष्यस्यच अशुभं इच्छजदः अंतः रत्ने न ददौ ॥ 186 कर्म्मणा कथं रतस्मात्

---

[1] All but S ⁴ · દ્ભુવે.

[2] Both omit या.

[3] So both.

प्रभवति ॥ 187 चेत् एते अशुभं कर्म्मणा चक्रुः ऋते कामात् इन्द्रजदस्य ॥ 188 इन्द्रजदस्यच परिज्ञानं करणेन तेषां समुत्पन्नं ॥ 189 ततः इन्द्रजदो निजेन कामेन असंपूर्णः ॥ 190 मनुष्याश्च कामेन आदेशं इन्द्रजदस्य प्रतिस्खलितुं प्रतिद्वंद्वि कामस्य इन्द्रजदीयस्य अशुभं कर्त्तुं बलिष्ठा अधिकशक्तयश्च संति ॥ 191 इन्द्रजदश्च अंतः निजे कामे निजदासानांच प्राणे अप्रधानतरः प्रकटः ॥ 192 चेत् वदंति यदमून् पश्चात् नरकनिग्रहेषु घोरतरेषु प्रापयति ॥ 193 तच्चेत् इन्द्रजदः शक्तः कर्त्ता पापकरणस्य न विमोचनं[2] मनसश्चैषां अपहरणं लाभितरं रक्षायाश्च इन्द्रजदस्य अनुरूपितरं कर्त्तुं विमुक्तात् ॥ 194 अनुमानेनैव तेन संतुष्टोऽभूत् ॥ 195 पश्चात् संतुष्टोऽपि स्त्रीयां सृष्टिं निगृह्णाति ॥ 196 कार्येनैकेनापि यत् विमृशामः अथ अशक्तित्वं अथवा किंचिज्ज्ञानत्वं अथवा हीनोत्तमत्वं इतस्तात् प्रकटायते ॥ ॥

---

[1] JE om. [2] Both विमुंचनं.

197 चेत् वदंति यत् इञ्जदोऽशुभं ददौच[2] आरचत्[3] तेन हेतुना यत् यावत् मनुष्याः उत्कर्षमत्तां शुभस्य अधिकं जानंति ॥ 198 तदेतत् पश्येत यच्चेत् अशुभं परिज्ञानाय शुभस्य अभीष्टं लाभवच्च ततोऽस्य अशुभं अस्ति उत्तमः कामः ॥ 199 चेत् अस्य अशुभं अस्ति उत्तमः कामः अभीष्टं लाभवच्च तस्य यत् वदंति यदस्य अशुभं न कामः निराकर्तृ ॥ 200 तच्च यत् वदंति यदसौ मरणं दुःखं दौष्ठ्यं तस्मै हेतवे ददौ यत् यावत् मनुष्याः उत्कर्षमत्तां जीवितस्य आरोग्यस्य शक्तेश्च अधिकतरं अवगच्छंति ॥ 201 अंतश्च इञ्जदे त्रिधाप्रहरककारितरा भवंति ॥ 202 तदेतत् पश्येत यत् यथा निःकारणं कर्म्म तेन प्रकारेण असौ यो मूल्यविक्रयी विषौषधस्य वृद्धये विषं मनुष्येभ्यो ददाति ॥ 203 किल यावत् विषौषधं महत्तरं मूल्यमत्तरंच विक्रीणाति[2] ॥ 204 इयं कस्मात् मध्यस्थकर्म्मता यत् परिज्ञानाय मूल्यमत्तां

---

[1] JE om. [2] So both. [3] So both, see § 51.

शुभस्यापरस्य दुःखं मरणं अन्यायंच उपरि अन्यस्मिन् प्रतिक्षिप्यति ॥ ॥

205 द्वितीयंच तत् यत् समुदायीकाः एके तेभ्यो वदंति यत् इञ्जदः सकलाभिः सृष्टिभिः दातिभिश्च पार्थिवः ॥ 206 यतः सृष्टयः समग्राः तस्य स्वाधीनाः संति ॥ 207 यथास्य रोचते यदस्य रोचते उपरि तासां कुरुते नच बलात्कारकरः ॥ 208 यतो बलात्कारः स यं उपरि कस्यचित् अस्वाधीनस्य कुर्व्वेति ॥ 209 ततः स यः केषांचित् सर्व्वेस्वाधीनानां यथास्य रोचते उपरि तेषां कुरुते नच बलात्कारकरः ॥ 210 तदहो अवबुध्येत यच्चेत् पार्थिवत्वात् यो बलात्कारं कुरुते नच बलात्कारी आकार्यः ॥ 211 तत् असौच यः पार्थिवोऽनृतं वक्ति सत्यवाक् अस्ति ॥ 212 असौच यः पार्थिवत्वात् दोषं पापं चौर्यं अपहारंच कुरुते नच पापकारी आकार्यः ॥ 213 एवं यथा तत् यत् हूफरवर्द्दरोशनः आदरफरोबगस्य पुत्रः प्रतिरूपतया प्रत्यवोचत् ॥ 214 यत् नैः

---

[1] So both, but S om. [2] JJ ७ · ४, JE ७ · ४, S om.

[illegible]

मनुष्यैको दृष्टो यो गर्हेभीं सदैव मघ्नाति ॥ 215 यदिच नैः तस्मात् पृष्टं यदिदं गर्ह्यतरं कार्यं किमिति कुरुषे ॥ 216 असौच शुद्धा प्रत्यवोचत् यत् गर्हेभी मे स्वाधीना ॥ ॥

217 द्वितीयंच इदं श्तेभ्यो ननु पृच्छेत ॥ 218 यत्[2] इञ्जदः श्ताः सृष्टीः दातोश्च याश्चकार सम्मुखं तासां मित्रः किंवा शत्रुः ॥ 219 चेत् सृष्टिमित्रः ततोऽस्य न युज्यते अशुभं अन्यायंच सृष्टीनां समीहितुं दातुंच ॥ 220 स्वीयानां सृष्टीनां विधूननात् अन्यायाच्चासां कदाचित् तृप्तो न बभूव ॥ 221 चेत् सृष्टिशत्रुः ततोऽस्य न युज्यते निजबलिष्ठज्ञानेन तत् किंचिदपि समारचितुं[3] दातुं यदस्य शतुं असानुकूलंच[4] असौच सम्मुखं कामं युध्यति ॥ ॥

222 इदंच ननु पृच्छेत ॥ 223 यत् इञ्जदः सदैव शुभज्ञानी सुराजा समृद्धिकरः ॥ 224 किंवा दुष्टज्ञानी कुराजा बलात्कारकरः ॥ 225 अथवा अस्ति कदाचित् यत् शुभज्ञानी सुराजा समृद्धिकरः ॥

---

[1] So both always, but better [illegible] (see S). [2] Both यतः. [3] So both, see § 51. [4] JJ om. च.

226 ; 227 ॐ 228 ॐ 229 ॐ 230 ; 231 ॐ 232 ॐ 233 ॐ 234 ॐ 235 ; 236 ॐ 237 ॐ 238

---

226 अस्ति कदाचित् यत् दुष्टज्ञानी कुराजा बलात्कारकरः ॥ 227 चेत् सदैव शुभज्ञानी सुराजा समृद्धिकरः ॥ 228 ततोऽस्य न स्यात् अंतर्नगरे राज्ये बलात्कारः उपद्रवः आक्रंदश्च ॥ 229 अस्य सृष्टिमित्रता सृष्टेश्च सम्मुखमस्य मित्रता केवलैव ॥ 230 इति हेतोः उपरि स्वीयानां सृष्टीनां पालनाकरः ॥ 231 अस्य सृष्टिश्च त्रिधाप्रहरककारिणी सम्मुखंच स्तुतिकरा केवलं मित्राच ॥ 232 अस्य नामच इन्नजदीयं अनुरूपं आत्मनः ॥ 233 चेत् दुष्टज्ञानी कुराजा बलात्कारकरः ॥ 234 ततः स्वयमेव सृष्टिषु केवलः शत्रुः अस्य सृष्टिश्च सम्मुखं एवं विधा ॥ 235 इति हेतोः सृष्टीनां विध्वंशयिता विनाशयिता विमोहनाकरः ॥ 236 अस्य सृष्टिश्च एतस्मात् आक्रंदिनी सम्मुखं युद्धकारिणी केवला विरोधिनी ॥ 237 अस्य नामच इन्नजदीयं अननुरूपनामसन्निभं[2] ॥ 238 अस्य नित्यत्वाच्च सृष्टीनां अनंतकालीयात्

---

[1] JJ ; JE ; but see S. [2] Both omit म.

47025

उपद्रवात् अन्यायात् निर्भयी भवितुं अनाशा एव ॥ 239 चेत् अस्ति कदाचित् यत् सुराजा शुभज्ञानी समृद्धिकरः अस्ति कदाचित् यत् अन्यथा व्यत्ययितः[1] एतस्मात् ॥ 240 ततोऽस्य मित्रता सृष्टीनां[2] समला ॥ 241 समलमित्रत्वाच्च समलकर्म्मी ॥ 242 समलकर्म्मत्वाच्च समलः स्वयमपि प्रकटायते ॥ 243 अस्य सृष्टिश्च सम्मुखं समलमित्रा ॥ 244 समभागात् नो चेत् मित्रा अस्य नच विरोधिनी नच त्रिधाप्रहरककरा अस्य नचाक्रंदिनी नच स्तुतिकरा अस्य[3] नच निंदाकरा अमुना प्रकारेण उपरि सर्व्वासां सृष्टीनां चित्रकृत् प्रकटः ॥ ॥

245 द्वितीयंच इदं यत् यथा सर्व्वं किंचित् यदंतर्जगति एतस्मात् नामद्वयात् शुभस्य अशुभस्य नो बहिः ॥ 246 तच्चेत् शुभं अशुभंच सर्व्वं इज्यजदात् कामेनच इज्यजदस्य उह्यीयते ॥ 247 तत् वराकः आहर्म्मनो निरर्थकं अपकीर्त्तितः अपापोऽमूलास्पदश्च[4] कदाचि-

---

[1] So both. [2] Both पृथ्वीनां. [3] Both ऽस्य. [4] Both ऽमूलास्पदंच.

[illegible]

248 [illegible]

[illegible]

249 [illegible]

[illegible] 250 [illegible]

[illegible] 251 [illegible]

[illegible] 252 [illegible]

[illegible] 253 [illegible]

[illegible] 254 [illegible]

दपि विरुद्धोऽपहारीच नाभूत् नच भविष्यति ॥ 248 तच्च यत् अंतः आगमे वक्ति यत् आहर्म्मनो ऽपहत्ता बभूव अमून्[5] स्वर्गात् बहिः कुरुते[5] निरर्थकं ॥ 249 यतस्तच्च अपहारित्वं अकृतादेशत्वं सर्व्वं कामेन इन्नजदस्य ॥ 250 चेच्च शुभं इन्नजदात् कामेनच इन्नजदस्य अशुभंच मनुष्यात् उत्पद्यते ततः आहर्म्मनस्य अमूलास्यदस्य अपापस्य अस्य शापो निंदाच निरर्थकं ॥ 251 चेत् प्रवृत्तोऽयं सकलोऽन्यायोऽशुभं न विभिन्नरत्नत्वात् किंतु स्वत्वात् एकरत्नत्वाच्च आत्मनः इन्नजदस्य ॥ 252 ततः[6] इन्नजदः स्वीयाभिमुखं शत्रुः प्रतिघातीच अस्ति ॥ 253 इदंच यत् ऋते रत्नात् पापस्य पापं समुद्भूतमिति वक्तुं अतीव विमूढता ॥ 254 यथा पापस्य रत्नात् उत्तमात् गणना विमूढा [3]तथा आहर्म्मनस्यापि यो मूलं मूलास्यदं अस्ति सकलस्य पापस्य दातेः सृष्टेश्च इन्नजदस्य गणनं विमूढतरं ॥

---

[1] JJ has ⸗ changed into ʒ, JE has ʒ. [2] JE om. [3] JJ begins a new section here. [4] Both have ⸗ for ⸗. [5] So both; better नैश्च . . . कृतो. [6] JE तत्.

255 संक्षेपात् इदं यच्चेत् आद्यं किंचित् अस्ति यत् न अंतः कामे इञ्जदस्य चेत् सर्व्वं किंचित् कामेन इञ्जदस्य कोऽपि न पापकर्म्मी ॥ 256 गुरुश्च दीनिश्च विनिर्म्मिता निरर्थकं ॥ 257 चेत् पापकारितया कश्चित् अवलोपितुं युज्यते तदसौ अवलोपितुं योग्यतरो यो मूलं कर्त्ता धर्त्ता आरचयिताच सकलस्य अशुभस्य पापस्यच ॥ 258 चेत् अशुभं पापंच आहर्म्मनात् अथ मनुष्याच उद्गीर्यते तद्यथा ते सर्व्वेऽपि आरचिता दत्ताः इञ्जदेन संति ततो मूलनिधानं सर्व्वं असौ यो मूलकारणं अशुभस्य ॥ 259 अशुभात् अशुभतरं ॥ ॥

260 इदंच ननु पश्येत यत् समग्राण्यपि दर्शनानि स्वीयेभ्यो गुरुभ्यः प्रवृत्तानि इदं वदंति यत्नैः[4] उक्तं आदिष्टंच निजेषु यूथेषु यत् पुण्यं कुर्यात पापात् प्रतिरक्षेत ॥ 261 विमोहनत्वात् इदं न विमृशंति यत् पापं यदादिष्टं यत् मा

---

[1] Both om. [2] Perhaps for ; JE has altered into . [3] JJ . [4] Both यत्नो.

[illegible]

कुर्यात यः कुरुते नरके अनंतकालं निक्षेपयामि तत् कुतः कस्मात् मूलात् युज्यते भवितुं ॥ 262 यतश्चेत् सकलमपि इश्वजदात् ततोऽस्य अदानं समाधानतरमासिष्यत पश्चात् दानात् प्रकटत्वे समानीतात् एतस्माच्च परिरक्षितुं समादिष्टात् ॥ 263 यदिच्च किमपि लाभं हेतुंच दानस्य आरचनस्य अशुभस्य नावलोकामहे ॥ ॥

264 द्वितीयंच संतस्तेषां आगमेषु उपरि पुण्यस्य पापस्यच असंबद्धतया वक्ति ॥ 265 यत् पुण्यं पापंच द्वितयमपि मन्नः ॥ 266 न देवाः नच राक्षसाः समर्थाः संति कस्यापि विपन्निकरणे ॥ 267 न कश्चित् दीनिं प्रत्यकरोत् पुण्यंच[2] चकार न कश्चित् अगदीनित्वेन प्रचचार पापंच चक्रे विना कामेन मे ॥ 268 संतः सर्वेषु आगमेषु प्रचुरतया प्रचर्य आलिखेत् शापं सृष्टिषु कुर्यात् ॥ 269 यत् किमिति मनुष्याः तत् पापं यदहं तैः कामयामि कामयंति कुर्वंतिच ॥ 270 अधिकं

---

[1] JE, S om. [2] JJ om.

कामेन कर्म्मणाच स्वीयहस्तीयेन भवति तेषां निग्रहः उपरि वपुषि आत्मानंच[2] त्रासयति ॥ 271 अन्यस्मिन् स्थानेच वक्ति यत् अहं स्वयमस्मि विमोहनाकरो मनुष्याणां यतश्चेत् मे कामे स्यात् ततोऽहं मार्गं सत्यं दर्शयामि विना मे कामेन यत् नरकं प्रयांति[3] ॥ 272 अन्यस्मिन् स्थानेच वक्ति यत् मनुष्याः स्वयं संति कर्त्तारः पापस्य ॥ 273 अमीभिस्त्रिभिः प्रकारैः इश्वजदः उपरि स्वीयासु सृष्टिषु विभिन्नरीत्या साक्ष्यं ददाति ॥ 274 एकंच इदं यत् स्वयं आहर्म्मनः ॥ 275 एकंच इदं यत् स्वयं अस्ति विमोहनाकरः सृष्टेः ॥ 276 अन्येनच शृंगारेण स्वीयां सृष्टिं समं आहर्म्मनेन विमोहकारितया समभागिनीं कुरुते किल अस्ति यत् अहं करोमि अस्ति यत् आहर्म्मनः ॥ 277 तेन यत् वक्ति यत् मनुष्याः पापं स्वयं कुर्व्वंति तदसौ स्वीयं वपुः दूरतया पापात् समं आहर्म्मनेन समभागि चक्रे ॥ 278 यतश्चेत् मनुष्याः पापं कुर्व्वंति निजरत्नत्वात्

[1] So JJ; JE om. [2] So both. [3] Both प्रयाति.

निजव्यामूढत्वात् ततः इञ्जदः समं आहर्म्मनेन पापात् दूरे ॥ 279 यतो यथा न इञ्जदात् नच आहर्म्मनात् ॥ ॥

280 द्वितीयंच तेभ्यो ये मुषजरीकाः आकार्यंते ननु पृच्छेत ॥ 281 यत् इञ्जदस्य समग्रान् मनुष्यान् स्वतंत्रकामतया पापात् परिरक्षितुं नरकाच्च शोधयितुं स्वर्गेच नयितुं[4] कामः किंवा नो ॥ 282 चेत् वक्ति यत् नो ॥ 283 तदसौ निर्व्विवेज उपरि हीनोत्तमत्वे इञ्जदस्य निकृष्टत्वं अस्य कामः ॥ 284 इति हेतोः इञ्जदत्वेन स्तोतुं न योग्यः ॥ 285 चेत् वक्ति यदस्य कामः ॥ 286 तदसौ निर्व्विवेज उपरि उत्तमकामत्वे इञ्जदस्य ॥ 287 इति हेतोः इञ्जदत्वेन स्तोतुं योग्यः ॥ 288 इदंच यदसौ[5] कामकर्तुं शक्तः किंवा नो ॥ 289 चेत् वक्ति यत् नो ॥ 290 ततोऽसौ निर्व्विवेज उपरि अशक्तत्वे इञ्जदस्य तेन योऽस्य कामः ॥ 291 इति हेतोः

[1] Both ⸗ⲟⲩⲁⲓ, but see S and ch. xv, 77, 80, 82–84. [2] JJ ⲁⲩⲱ. [3] Both insert ⲉⲓ, but see S and § 290. [4] Both ⲛⲁⲓⲧⲉⲛ. [5] Better ⲁⲩⲱ ⲡⲉⲥⲁⲩ.

· ۴۱ · ۱۰۱۳۵۳۵۳۵۳۵۳۵ · ۴۰۰۰۰ — ۵۳۵۳۵۳۵ · ۵ · ۵۳۵۳۵۳۵۳۵۳۵ · ۳۵۳ · ۵۳۵۳ ·

۵۳۵ ۵۳۵۳۵۳۵۳۵۳۵ · ۱۰۰۰۰۳۵ · ۵۳۵۳۵ 292 ۵۳۵۳۵۳۵ · ۵۳۵۳۵ · ۵۳۵ · ۵ · ۵۳۵۳۵۳۵ · ۵۳۵۳۵ ·

۵۳۵ ۵۳۵۳ · ۵۳۵۳۵ · ۴۰ · ۵ · ۱۰۰۰۰۳۵ · ۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵ 293

· ۴۰ · ۱۰۰۰۰ — ۵۳۵۳۵۳۵ · ۵ · ۵۳۵۳۵۳۵۳۵۳۵ · ۳۵۳[1] · ۵۳۵ · ۵۳۵ · ۵۳۵ 294

· ۵۳۵ · ۵۳۵[2] · ۵ · ۵۳۵۳۵۳۵ · ۴۰۰ · ۵۳۵ 295 ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵

· ۵۳۵۳۵۳۵ · ۵۳۵۳۵ 296 ۵۳۵ ۴۱ · ۵۳۵۳۵۳۵ · ۵۳۵۳۵ · ۱۰۰۰۰۳۵ · ۵۳۵۳۵۳۵

· ۵۳۵۳۵۳۵ · ۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵۳۵۳۵۳۵۳۵ · ۴۰ 297 ۵۳۵ ۵۳۵۳۵ · ۵

· ۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵۳۵ · ۵ · ۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵

· ۴۰ · ۴۰۰ 298 ۵۳۵ ۵۳۵۳۵۳۵۳۵۳۵ · ۴۰ · ۵ · ۵۳۵۳۵۳۵[3] · ۵۳۵۳۵۳۵۳۵۳۵

۵۳۵ ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵ · ۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵

· ۴۱ · ۴۱ · ۱۰۰۰۰۳۵ · ۵۳۵ · ۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵ 299

· ۴۱ · ۴۱ · ۱۰۰۰۰۳۵ · ۵۳۵ · ۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵ 300

۵۳۵ ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵

۵ · ۵۳۵۳۵۳۵۳۵۳۵ · ۴۰ · ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵ · ۵۳۵ · ۴۰ · ۵۳۵۳۵۳۵۳۵۳۵

۵۳۵ ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵۳۵۳۵۳۵

· ۵۳۵۳۵۳۵۳۵۳۵ · ۴۰ · ۵۳۵۳۵۳۵۳۵۳۵ 301 ۵۳ · ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵ · ۴۰ · ۵۳۵۳۵

· ۵۳۵۳۵۳۵۳۵۳۵ · ۴۰ · ۴۰۰ · ۵۳۵۳۵۳۵۳۵۳۵ · ۴۱ · ۵۳۵۳۵۳۵۳۵۳۵

· ۵۳۵۳۵۳۵۳۵۳۵ · ۴۱ · ۵۳۵۳۵۳۵۳۵۳۵ 302 ۵۳۵ ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵ · ۵۳۵۳۵[4] · ۵۳۵۳۵

इञ्जदत्वेन सर्व्वशक्तिना स्तोतुं न योग्यः ॥ 292 चेत् वक्ति यत् कामकर्त्तुं शक्तः ॥ 293 तदसौ निर्व्विवेज उपरि शक्तित्वे तस्य योऽस्य कामः ॥ 294 इति हेतोः इञ्जदत्वेन सर्व्वशक्तिना स्तोतुं योग्यः ॥ 295 द्वितीयंच इदं यच्चेत् असौ कामं कर्त्तुं शक्तः कुरुते किंवा नो ॥ 296 चेत् वक्ति यत् कुरुते ॥ 297 ततः प्रकटीकृतं स्यात् उपरि सर्व्वेषु मनुष्येषु प्रतिरक्षणं यत् पापात् शोधनंच यत् नरकात् समानयनंच स्वर्गलोके ॥ 298 इदं तत् यदस्य सत्तायाः अप्रकाशयितृ निजदीनेश्च असत्यकारं ॥ 299 चेत् वक्ति यदसौ कामं कर्त्तुं शक्तः परं न कुरुते ॥ 300 ततोऽसौ निर्व्विवेज उपरि अप्रतिपालकत्वे इञ्जदस्य मनुष्यशत्रुत्वे निजकामाप्रवृत्तित्वे ॥ 301 यतश्चेत् कुरुते अस्यात्मनो न हानिः मनुष्याणांच लाभः अस्यच निजकामप्रवृत्तिः ॥ 302 चेत् न कुरुते

---

[1] Both omit, but see S and § 291. [2] JJ om. ۵۳۵. [3] JE first omitted · ۵۳۵ · ۰ ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵۳۵, and was afterwards altered into · ۵۳۵۳۵۳۵۳۵۳۵ · ۰ · ۵۳۵۳۵ · ۵۳۵ · ۰ · ۵۳۵۳۵۳۵۳۵۳۵۳۵۳۵۳۵۳۵ ۵۳۵۳۵۳۵۳۵۳۵۳۵ · ۰ · ۵۳۵۳۵۳۵۳۵۳۵ · ۵۳۵. [4] JJ om.

[illegible]

अस्यात्मनो न[2] लाभः मनुष्याणांच हानिः अस्यच निजकामोऽप्रवृत्तिः ॥ 303 द्वितीयंच इदं यत् कामेन न कुरुते किंवा अकामः ॥ 304 चेत् वक्ति यत् कामेन न करुते ॥ 305 ततोऽसौ निर्व्विवेज यत् इञ्जदः शुभकामी अस्य शुभं कर्त्तुं न कामः ॥ 306 इदं असंबद्धत्वात् अवमंतुमपि कुत्सितं ॥ 307 चेत् वक्ति यत् अकामः इति हेतोर्न करुते ॥ 308 ततोऽसौ निर्व्विवेज उपरि कृशत्वे इञ्जदस्य अंतः खतायां अथवा सत्तायांच विध्वंसयितुः अस्य कामं ॥ ॥

309 संक्षेपात् इदं यदस्य जगतः प्रवृत्तिकर्त्री अप्रतिपक्षोऽप्रतिद्वंद्वी संपूर्णो ज्ञानत्वेन उत्तमत्वेन शक्तित्वेन स्यात् इदं सकलमपि अननुरूपकर्म्मत्वं उपद्रवोऽन्यायश्च दुःखं कष्टंच प्रभूतं मनुष्याणां अपरासांच सृष्टीनां न भवेत् ॥ 310 यतश्चेत् प्रवृत्तिकर्त्री अप्रतिपक्षो ज्ञानत्वेनच संपूर्णः अशुभस्य असंभवने उपायं औषधंच अशुभं अपनेतुंच[3] जानाति ॥ 311 चेत्

[1] Both *, but see S and §§ 283, 286, 290, &c. [2] Both om. [3] JE om. च.

उत्तमत्वेन संपूर्णः प्रतिपालकश्च अशुभसंभवने प्रथमत एव अकामी अभाविकामश्च ॥ 312 चेत् शक्तित्वेन संपूर्णः अशुभं लवस्यापि[3] असंभवने शक्तः ॥ 313 ननु यथा अंतर्जंगति यस्य प्रवृत्तिकर्त्ता इज्यजदोऽस्ति अशुभस्य सत्ता निःसंदेहतया दृश्यतरा पश्चात् एतस्मादपि एतावत् न[4] पृथक् यदथवा[5] प्रवृत्तिकर्त्ता प्रतिपक्षवान् अथवा अप्रतिपक्षः ॥ 314 चेत् अशुभस्य असंभवने उपायं औषधंच अशुभं अपनेतुं न जानाति प्रकटायते ततोऽपूर्णज्ञानत्वं इज्यजदस्य ॥ 315 अथ चेत् अस्य अशुभं अस्ति उत्तमः कामः प्रकटायते अपूर्णोत्तमत्वं यदस्य कामस्य ॥ 316 अथ चेत् अशुभस्य असंभवने अपनयनेच न शक्तः प्रकटायते असंपूर्णशक्तित्वं इज्यजदस्य ॥ 317 चेत् ज्ञानत्वेन अथवा उत्तमत्वेन अथवा शक्तित्वेन एकेनापि न संपूर्णः ततः इज्यजदत्वेन सर्व्वेशक्तिना सर्व्वोत्तमेन सर्व्वज्ञानिना स्तोतुं अर्च्चितुंच न योग्यः ॥ ॥

---

[1] Both om. [2] om. seems wanting, see S. [3] JJ लवस्यापि, to which JE adds the marginal gloss जनस्यापि; compare § 325, ch. xiii, 135. [4] Both om. [5] JE यदाथवा.

318 इदंच ननु जानीयात यत् यथा कश्चिदपि विद्यमानः पदार्थो यः कर्त्ता कामवान् विना यथास्थक्रियशक्तया न शक्तो बभूव ॥ 319 तच्चेत् दातुः मूलसत्ता इत्थजदत्वं अस्य यथास्थताच उद्द्योतत्वं सुरूपत्वं सुगंधत्वं पवित्रत्वं उत्तमत्वं ज्ञानत्वं ततस्तत् यत् यथा तिमिरत्वं कुरूपत्वं दुर्गंधित्वं मलिनत्वं निकृष्टत्वं अज्ञानत्वं स्वयं देवीयं यथास्थत्वं ततस्तात् दूरे उपयुज्यते भवितुं ॥ 320 चेत् अस्य मूलसत्ता कांचित् देवत्वं अस्य यथास्थताच तिमिरत्वं कुरूपत्वं दुर्गंधित्वं मलिनत्वं निकृष्टत्वं अज्ञानत्वं ततस्तत् यत् इत्थजदीयं यथास्थत्वं ततस्तात् बहिरास्ते ॥ 321 चेत् एकोऽस्ति यस्येदं सकलं अस्यैव अंतः स्तायां अविक्तायां[8] समाश्लिष्टं ततोऽस्य अविभक्तत्वात् शुभेन अंतर्निजेऽन्याये विभक्तत्वं नास्ति ॥ 322 ननुच आज्ञाकराणां आज्ञा विलीना ॥ 323 यतोऽसौच यः पुण्यकर्म्मत्वात्

---

[1] JJ seems wanting, see S and ch. xvi, 75, 76. [2] Both om. [3] JJ , but see § 320. [4] Both . [5] Both have this word after the next, but see S and § 319. [6] So both. [7] Both . [8] JE alters वि into विवि.

स्वर्गे प्रयाति तत्रापि अशुभेन अन्यायेन ॥ 324 यतस्तत्रापि शुभस्य अशुभात् पृथक् विभक्तिर्नास्ति ॥ 325 चेत् किंचित् शुभं अस्ति यत् विभिन्नं अन्यायात् ततोऽन्यायोऽप्यस्ति यः शुभात् पृथक् विभक्तः ॥ 326 इदंच प्रसिद्धमेव यत् शुभस्य अन्यायस्यच विभिन्नत्वं विभिन्नरत्नात् ॥ 327 यत्नयोः विभिन्नत्वं विभक्तिश्च द्वितीयाद्विभिन्नरत्नत्वात् द्वयोर्मूलयोः प्रकटा ततः आशाकराणां आशा सत्या ॥ 328 तेषांच ज्ञानता सहायिनी ॥ ॥

329 इदंच ननु ज्ञानीयात यत् सकलमपि वाक्यं यत् न निजेन सीम्ना अशृंगारं अनभिलषणीयंच ॥ 330 इदंच यत् सीमा इच्छजदत्वस्य मुख्यतरा[4] ज्ञानता ॥ 331 सीमाच ज्ञानतायाः एका लाभवत्कर्म्मता ॥ 332 लाभवत्कर्म्मता अहानिकारिता ॥ 333 हानिकारिता प्रकारैस्त्रिभिः ॥ 334 एकाच सा यदात्मनो न लाभः [3][अन्येषांच हानिः ॥ 335 एकाच सा] यदन्येषां न लाभः अस्यात्मनो

---

[1] Both have ... for ..., but see S. [2] JE has ... for ... [3] JE om. text in brackets, but inserts ... in margin. [4] Both have ... for ....

[illegible] 336 [illegible]

[illegible] 337 [illegible]

[illegible] 338 [illegible]

[illegible]

339 [illegible]

[illegible] 340 [illegible]

[illegible] 341 [illegible]

[illegible] 342 [illegible]

[illegible] 343 [illegible]

[illegible] 344 [illegible]

[illegible] 345 [illegible]

[illegible] 346 [illegible]

[illegible] 347 [illegible]

हानिः ॥ 336 एकाच सा यदात्मनश्च हानिः अन्येषांच हानिः ॥ 337 इज्यजदस्यच ज्ञानकार्य्यिणः आरचनात् आहर्म्मनस्य देवानांच आत्मनो न लाभः अन्येषांच हानिः ॥ 338 अस्यैव[4] निजकामस्य निजकर्म्मत्वात् अप्रवृत्तिः सदैव प्रकटायते ॥ ॥

339 इदंच यत् चेत् इज्यजदस्य कामः उत्तमत्वं ॥ 340 अस्यच कामो नित्यः ॥ 341 अनुरूपिणाच कामेन शक्तः आस्ते ॥ 342 किल मूलात् यावत् निष्ठीर्णं अंतर्जगति सर्व्वं उत्तमत्वं सदाचारत्वं इज्यजदकामस्य प्रदास्ते[5] ॥ 343 तन्नतु प्रकटमेव यत् निकृष्टत्वं अनाचारत्वं प्रभूतं विस्फीतं सदैव प्रचरति ॥ 344 पश्चात् अस्मादेकस्मादेव अथवा कामेन इज्यजदस्य सदैव प्रचरति अथवा अकामेन ॥ 345 चेत् कामेन इज्यजदस्य सदैव प्रचरति तत् स्पष्टमेव यदस्य कामश्च निकृष्टत्वे एवं यथा उत्तमत्वे ॥ 346 अथवा कामेन अशक्तो विपर्य्ययीच ॥ 347 यथा कामः

---

[1] Both [illegible]. [2] JE adds [illegible]. [3] * seems wanting, see S and §§ 350, 357.
[4] JE अस्यच. [5] Perhaps for प्रदत्तमास्ते.

ક્રુતે હેતોઃ અથવા ક્રુતે વિશ્રામયિતુઃ ન વિપર્યયતિ ॥ 348 તત્ એતસ્માત્ દ્વિતયાત્[3] એકં અથવા હેતુત્વાત્ અથવા અન્યોઽસ્તિ વિશ્રામયિતા અસ્ય કામં ॥ 349 ચેત્ ન કામેન ઇન્નજદસ્ય સદૈવ પ્રચરતિ ॥ 350 તતઃ સ્પષ્ટમેવ યત્ ઇન્નજદઃ અંતઃ સ્વીયે કામે પીડિતઃ અસ્ય કામો ન પૂર્ણઃ ॥ 351 અથવા અસ્ય અસ્તિ વિરોધી યો નિવંદ્ધા કામં ॥ ॥

352 ઇદંચ યે વદંતિ યત્ ઇન્નજદઃ આદમાય આદિદેશ યત્ અસ્માદેકસ્માદ્વૃક્ષાત્ યઃ અંતઃ સ્વર્ગે મા ભક્ષેઃ ॥ 353 તેભ્યો નનુ પૃચ્છેત ॥ 354 યત્ આદેશો યં ઇન્નજદઃ આદમાય દદૌ કિલ એતસ્માત્ વૃક્ષાત્ મા ભક્ષેત શુભોઽભૂત્ કિંવા અશુભઃ ॥ 355 ચેત્ આદેશઃ શુભોઽભૂત્ તત્ સ્પષ્ટમેવ યત્ વૃક્ષોઽશુભોઽભૂત્ ॥ 356 તત્ર યુજ્યતે ઇન્નજદસ્ય કિંચિત્ અશુભં આરચિતું ॥ 357 ચેત્ વૃક્ષઃ શુભોઽભૂત્ આદેશશ્ચ અશુભોઽભૂત્ તત્ર યુજ્યતે ઇન્નજદસ્ય અશુભં આદેશં

---

[1] * seems wanting, see S and §§ 350, 357. [2] JJ ૭*. [3] Both દ્વિતીયાત્.

दातुं ॥ 358 चेत् वृक्षः शोभनोऽभूत् असौ आदेशंच अखादने ददौ तत् उत्तमत्वे प्रतिपालत्वेच इञ्जदस्य अननुरूपं शुभं दासेभ्योऽपापेभ्यः स्त्रीयेभ्योऽवगोपितुं ॥ ॥

359 इदंच ये वदंति यत् इञ्जदः सर्व्वं यं समीहते प्रबोधे मार्गेंच सत्ये समानयति असौ तेनच प्रसाददानेन शुभप्रवृत्तौ अनंतायां प्रापयति ॥ 360 यंच न समीहते तं अदीनित्वेन इञ्जदापरिज्ञानत्वेन समुत्सृजति असौच तेन हेतुना नरके अन्यायेच अनंते अवकिरति ॥ 361 तेभ्यो ननु पृच्छेत ॥ 362 यत् असौ उत्तमो यस्य रूचितं कामश्च दीन्या प्रबोधेनच इञ्जदस्य मार्गेणच सत्येन किंवा असौ यस्य रूचितं[4] कामश्च अमार्गेत्वेन अदीनित्वेन इञ्जदापरिज्ञानत्वेन ॥ 363 चेत् वक्ति यदसौ उत्तमो यस्य रूचितं कामश्च दीन्या इञ्जदस्य मार्गेणच सत्येन ॥

---

[1] Both [illegible]. [2] Both [illegible]. [3] Both [illegible], but see S. [4] Both भवितं.

[illegible] 364
[illegible]
[illegible]
[illegible]
[illegible] 365
[illegible] 366 [illegible]
[illegible]
[illegible]
[illegible]
[illegible] 367 [2][illegible]
[illegible]
[illegible] 368 [illegible]
[illegible]
[illegible] 369 [illegible]
[illegible]
[illegible]

---

364 तत्रनु एनं मनुष्यं यस्मिन् इज्जदस्य कामो[3]ऽयं यत् अदीनित्वेन अमार्गत्वेन इज्जदापरिज्ञानत्वेन समुत्सृजति आचार्यः अथवा अन्यो मनुष्यः सखा दीनौ इज्जदस्य मार्गेच सत्ये आह्वानयति॥ 365 ततः इज्जदस्तस्य उत्तमो लाभमत्तरः किंवा स आचार्योऽसौच मनुष्यः॥ 366 चेत् वक्ति यत् कामः इज्जदस्य तस्य उत्तमः ततः उक्तं भवति यत् इज्जदापरिज्ञानत्वं दीनेः अप्रतिकरणं अमार्गत्वंच उत्तमं इदं कुत्सितत्वाच्च अप्रतिकर्त्तव्यं आस्वाद्यंच॥ 367 चेत् वक्ति यत् दीनौ सत्यायां समागमनं इज्जदपरिज्ञानं तस्य उत्तमं लाभमत्तरंच॥ 368 ततः परिस्फुटं उक्तं भवति यत् आचार्यो मनुष्यश्च तस्य उत्तमः इज्जदात्॥ 369 यतो मनुष्यो यः उपरि मनुष्ये सत्यं मार्गत्वं इज्जदपरिज्ञानत्वंच समीहते अस्य कामः तस्य बहुतरं उत्तमः एतस्मात् यः इज्जदस्य॥

---

[1] Both [illegible]. [2] Only S indicates the words in brackets. [3] Both अकामः.

370 यस्य अपमार्गगैत्वं अपरिज्ञानत्वंच अदीनित्वंच उपरि तेषु कामः इञ्जदः प्रचुरं निकृष्टतरः इतस्मात् मनुष्यात् ॥ ॥

371 इदंच यच्चेत् पापिमनः पापिकर्म्मैत्वं मनुष्यस्य कामेन इञ्जदस्य तन्नु यः इञ्जदः पापिमनो ददौ असौ पापं अंतर्मनसि वापयामास[1] ॥ 372 असौ आहर्म्मनं[2] केवलं पापकरणे आधोषयति विरुद्धयतिच तत् पापिमनः इञ्जदस्य रुचितंच तस्य अलीकमत्तरं निकृष्टतरंच आधोषात् आहर्म्मनस्य ॥ 373 चेत् कर्णेआवणंच यत् आहर्म्मनात् करणंच पापस्य सर्व्वं पापिमनसः इञ्जददत्तात् रुचिताच्च तस्य तन्नु परिस्फुटमेव यत् इञ्जदः आहर्म्मनात् प्रचुरं निकृष्टतरः पापकारितरश्च ॥ ॥

374 उपरि इतस्मिन् वाक्ये अस्माभिर्विमर्शितं[3] ॥ 375 इतस्मात् द्वितयात् एकं शक्नोति भवितुं ॥ 376 अथवा

---

[1] Both om. वा. [2] JJ has न: for नं. [3] So both.



CHAPTER XII.



यत् सर्व्वं सत्यं अथवा यत् सर्व्वं अनृतं ॥ 377 अथवा अस्ति यत् सत्यं अस्ति यत् अनृतं ॥ 378 चेत् सर्व्वं सत्यं सर्व्वं वाक्यं एतस्मिन् वाक्ये न शोभते अनृतं किंचित् द्वितयंच सत्यं अनृतं ॥ 379 चेत् सर्व्वं अनृतं सर्व्वं वाक्यं एतस्मिन् वाक्ये न शोभते सत्यं किंचित् सम्मिश्रं द्वितयं ॥ 380 चेत् अस्ति यत् सत्यं अस्ति यत् अनृतं ॥ 381 ततः तच्च यत् सत्यं रत्नात् नाभेश्च सत्यताया: ॥ 382 तच्च यत् अनृतं रत्नात् नाभेः मूलास्पदाच्च अनृतस्य ॥ 383 मूले द्वे एवं एकं यस्मात् सत्यं एकं यस्मात् अनृतं ॥ ॥

CHAPTER XII.

1 अन्यच्च उपरि परस्परविरोधिन्यां तेषां वाचि वाक्यं कियच्चित् दीनिकद्वैलिखितात् ॥ 2 तच्च यत् ब्रुवंति यत् इज्यजदस्य परिवर्त्तुलं सर्व्वं किंचित् किंचिदपि

नांतरालेऽस्य ॥ 3 अंतश्च सर्व्वं किंचित् किंचिदपि न परिवर्त्तुलं अस्य ॥ 4 उपरिष्टात् सर्व्वं किंचित् किंचिदपि न अधस्तादस्य ॥ 5 अधस्तात् सर्व्वं किंचित् किंचिदपि न उपरिष्टादस्य ॥ 6 उपरिच आसने उपविशति नच स्थानवान् ॥ 7 अंतश्च आकाशे नच किंवान् ॥ 8 अंतश्च कस्मिंश्चित्[2] स्थाने नास्ति अस्तिच ॥ 9 सर्व्वस्मिंश्च[3] स्थानेऽस्ति अस्य स्थानं नास्ति ॥ 10 अस्य सर्व्वं किंचित् कामेन स्वीयेन स्वीयं भवति ॥ 11 मूलास्यदं द्वेषः उत्तमश्च ॥ 12 अनंतकालं अक्षमी कृपालुश्च ॥ 13 बलात्काररचयिता नच बलात्कारकरः ॥ 14 अनेनादिष्टो यः कर्त्तुं स्खलितुं अशक्तः इत्रजदीयमादेशं ॥ 15 असौ तं यं अपापं नरकीयमारचत्[4] नच बलात्कारकरः ॥ 16 दुर्गतित्वात् नरकिभूतान्[5] मनुष्यान् वेत्ति अस्य कामश्च तेषु ॥ 17 उत्तमकामी अथवास्य न कामोऽभूत् ॥ 18 उपायेन ददौ नच स्वयं आबाधी ॥ 19 अथवा न उपायेन किंतु अनुपायेन ददौ

[1] Both ह्रे. [2] So both. [3] Both सर्व्वस्मिन् च. So both; see ch. xi, 51.
[5] Both have की for कि; perhaps it should be कीय, as in § 15.

नच प्रतिपक्षवान् ॥ 20 विमर्शेदरिद्री[5] सर्व्ववेत्ताच ॥ 21 आदेशस्खलिता असौ स्वकामस्य ॥ 22 एनंच यः स्खलति बंधग्रहीतं कुरुते सुराजाच ॥ 23 अस्यादेशः सर्व्वप्रवृत्तः ॥ 24 आदेशस्खलिताच योऽस्यापेक्षी ॥ 25 अस्य कामोऽस्ति यत् न प्रवृत्तः ॥ 26 अस्य स्खलिता कामस्य न विरोधी कामस्य ॥ 27 अनेनादिष्टः स यस्य न कामः ॥ 28 अस्य कामः आदेशे नान्योन्यविरोधी अस्यादेशश्च कामे अन्योन्यविरोधी द्वितयमपि सदाचारि ॥ 29 असौ शुभकामी न अप्रवृत्तकामः ॥ 30 असौ अशुभकामीच यश्च किंचित् अशुभं कुरुते सोऽस्ति न्यायी ॥ 31 अन्यच्च प्रभूतं परस्परविरोधत्वं यदंतर्वचसि दर्शनानां ॥ 32 चेत् प्रमाणतो[6] दीनिः एतस्मात् बहुप्रकारात् परस्परविरोधिवाक्यात् न शक्नोति भवितुं स्वभावेनैव ॥ 33 अन्यथा तु तच्च यत् वदंति यत् द्विमूलास्पदसमालोचिनां कार्यं इअजदस्य कृशं

---

[1] Both insert ›. [2] Both om. [3] These two words change places in S.
[4] JE om. [5] JJ विमर्शी दरिद्री. [6] Both have तदी for तो; possibly for तया.

[illegible]

अप्रधानवच्च ॥ 34 न यथा महत्त्वेन इन्नजदस्य अनुरूपं ब्रुवंति ॥ ॥

35 उपरिच एतस्मिन् निवेशे अस्ति यत् ब्रवीमि निर्म्मलतया ननु समादिष्टं परिज्ञातंच ॥ 36 किल किंचित् यत् इन्नजदीयं असौ कृशतरं अप्रधानवत्तरंच कुरुते ॥ 37 यत् यो ब्रूते यत् सृष्टयः स्वीयाः याः अनेन आरचिताः सर्व्वाः अंतः अकृतादेशेऽश्रुतनिरोपे संजाताः संति ॥ 38 अन्यथा तु[5] लघुतनुतमापि सृष्टिः प्रत्यभिमुखं कामस्यास्य युध्यति ॥ 39 एवंच तान् प्रभूतान् प्रवीणान् आचार्यान् असौ यान् विनिर्म्मितवान् निजधान शूले चकार ॥ 40 अस्तिच यत् हीनान् लघून् अगौरवितान् चकार ॥ 41 इदंच यत् न केवलराज्यं निजं निकृष्टेभ्यः स्वयमारचितेभ्यो न पापौ किंतु राजानंच[6] स्वं स्वयमेव सप्रतिघातिनं कुरुते ॥ 42 कर्त्तृत्वंच निजं स्वभावेनैव स्वयं विध्वंसते ॥

---

[1] Both insert ऽ; perhaps a miswriting of ऽ (for ।), as S does not indicate final ऽ.
[2] Connected with §§ 52, 53. [3] JE om. [4] Both have ऽ for ऽ. [5] JJ om.
[6] JJ om. च.

[illegible] 44 [illegible] 43
[illegible]
[illegible] 45 [illegible]
[illegible] 46 [illegible]
[illegible]
[illegible]
[illegible] 47
[illegible]
[illegible] 48 [illegible]
[illegible] 49 [illegible]
[illegible] 50 [illegible]
[illegible] 51 [illegible]
[illegible]
[illegible] 52 [illegible]
[illegible]
[illegible] 53 [illegible]

---

43 सृष्टिंच स्वीयां स्वयं विनाशयति ॥ 44 पापकारितयाच निजया दासान् अपापान् स्वीयान् स्वयं निहंति ॥ 45 मित्रान् केवलभाविनो निजान् स्वयमेव दुर्बलान् दरिद्रिण: पापकर्म्मिणो विमोहितान् कुरुते ॥ 46 कोपेनैकेन दासस्य अपापस्य यथा आहर्म्मनस्य असंख्यां सृष्टिं स्वीयां विकलां विमुग्धां[4] कुरुते ॥ 47 उपरि पापे सीमावति यत् स्वीयात् कर्म्मण: अन्यं निग्रहं नि:सीमं उपरि अपापेषु निदधाति ॥ 48 द्वारंच क्षमाया: पर्यंतमत्नया निबध्नाति ॥ 49 अस्यच छेदात् दु:खात् अन्यायाच्च स्वीयानां सृष्टीनां तृप्ति: नास्ति ॥ 50 सदैव अंत: कर्म्मणि प्रवृत्तौच दधाति ॥ 51 मूले मध्ये निर्व्वाणेच आदेशस्य यं ददाति उपरि स्थातुं न शक्यते ॥ 52 अथवा असौ यो वक्ति यत् असौ इत्रजदो य: सदैव राजा सर्व्वज्ञानी सर्व्वशक्तिश्च ॥ 53 यस्य राज्यं ज्ञानं

---

[1] So all, but [illegible] seems better. [2] JE om. [3] Connected with §§ 36–38.
[4] Both विमुग्धां.

शक्तित्वंच नित्यं अनंतकालं ॥ 54 यस्मात् शुभं उत्तमत्वमेव ॥ 55 यस्य कर्म्मंच कारणेन आदेशश्च लाभमत्तया ॥ 56 उपरि स्वीयानां दासानां दयालुः क्षमाकरश्च ॥ 57 एतस्मिन् यो विजयत्वविधाता दासः संपूर्णं प्रसाददाता ॥ 58 उपरि एतस्मिन् यः पापकारी यः स्वीयपापकारित्वात् हस्तग्राहे दुष्टमनसो भवति संशोधनेन पातकत्वस्य क्षापयनेन दोषत्वात् मलिनत्वाच्च क्षमाकरः ॥ 59 निदाने कांचिदपि उत्तमां सृष्टिं अंतः हस्तग्राहे दुष्टमनसां न विमोक्ता ॥ 60 आसां अंतः सैन्ये संग्रामेच यः समं शत्रुभिः तनोर्जीवस्यच पाता धर्त्ता पालयिताच ॥ 61 राज्यस्यच निजस्य प्रतिपक्षात् पृथक्करत्वात् संपूर्णं प्रहरककर्त्ता[6] ॥ 62 अस्य वृंदं सैन्यंच[7] संग्रामेण सम्मर्देन विजयितरं जायते ॥ 63 निर्व्वाणेच विजयत्वविधाता स्वीयानां सृष्टीनां समस्तेभ्यः पातकेभ्यः ॥ ॥

---

[1] JE om. च. [2] JJ om. ण्य. [3] JJ om., JE ण्य. [4] JJ om. [5] Both om.
[6] JE हर्षकर्त्ता. [7] JJ om. च.

64 यदिच रोचिः ज्ञानं विलोकनत्वं जीवितं आरोग्यंच अपराच इञ्जदीया दातिर्निरीक्षते उपरि तमिस्रे अज्ञाने अंधत्वेच मृत्यौच मांद्येच अन्यस्मिंश्च देवीये चंचलत्वे संपूर्णे प्रधानवती गुर्द्वीच ॥ 65 यतः इदं प्रसिद्धमेव यत् रोचिः प्रस्थापका[4] अस्ति समग्रस्य तिमिरस्य ॥ 66 ज्ञानंच उपरि अज्ञाने विजयि ॥ 67 जीवितंच उपरि मृत्यौ बलवद्बृहच्च ॥ 68 यतो बलवत्त्वात् बृहत्त्वाच्च[5] जीवितस्य असंख्या प्रवृत्तिः सृष्टेः द्वाभ्यां मनुष्याभ्यां बभूव ॥ 69 अनेकानांच तेन प्रत्ययः ॥ 70 एवंच विलोकनस्य आरोग्यस्यच उपरि अंधत्वे मांद्येच कियतीच विजयताच बलवत्ताच प्रकटा ॥ 71 इदंच निरीक्षितुं युज्यते यत् प्रतिपक्षो दूजः किं समीहते सैन्यानिच इञ्जदस्य उपरि कस्मिन् युध्यंति ॥ 72 असौच यः प्रतिपक्षः इदं समीहते यत् एनां जगतीं आकाशंच सृष्टिंच रोचिष्मतां असतीं करोमि ॥

---

[1] JE अस्मान्. [2] Both have ु for ं. [3] So both. [4] Both have द for ष.
[5] JE has ङ्ग for ह्.

73 अथवा स्वकीयत्वे समानयामि स्वीयरत्नात् विभ्रामयामि ॥ 74 किल मा इन्द्रजदः शचीत्यानं अक्षयत्वंच कर्त्तुं सृष्टिं स्वीयां पुनः समारचितुं[3] शक्तो भूयात् ॥ 75 सैन्यानिच इन्द्रजदस्य उपरि एतस्मिन् युध्यंति यत् असौ प्रतिपक्षो हृचितेन कामे मा प्रयातु ॥ 76 इदंच यत् सैन्यं होर्म्मिजदस्य मूलसृष्टित एव युद्धेन बलिष्ठं कामेनच विजयि ॥ ॥

77 एतस्मात् प्रकटं यत् अस्ति इयं जगती आकाशंच विनिर्म्मितं ॥ 78 चेत् समग्रां सृष्टिं दातिंच असतीं कर्त्तुं शक्तः तत्किं एकामपि लघुतनुतमां सृष्टिं इन्द्रजदस्य असतीं कर्त्तुं न शक्नोति ॥ 79 यतो यद्यपि हेतुना मृत्योः तनुजीवात् विभिन्नायते न असत्ता व्ययताच रत्नस्य स्वत्वात् किंतु क्षीणत्वं लोलतायाः[4] ऊनत्वंच पृथक्[5] स्थानात् स्थाने कार्यात् कार्ये ॥ 80 अन्यथा तु तनुजीव-

---

[1] So JJ, ꣡ꣀ in JE. [2] Both ꣡ꣁꣃ, but see S. [3] So both, see ch. xi, 51.
[4] Both लोभतायाः, but see ch. iv, 56. [5] Both प्रत्.

CHAPTER XIII.

रत्नस्य एकैकशो निजरत्नतया पुनः अन्यस्मिन् सत्कार्ये संस्थानं कथं प्रकटं ॥ 81 अस्याः सृष्टेः दातेश्च संपूर्णप्रवृत्तितया नित्यकार्यतयाच यावत् कालं अभीप्सायाः लाभमत्तया सत्ता प्रकटा ॥ 82 यावच्च अत्र उपरि[3] एतस्मिन् निवेशे संपूर्णं रुचितं ॥ ॥

CHAPTER XIII.

1 द्वितीयंच उपरि मिथोविरोधिन्यां कुत्सितवाचि पूर्व्वागमीकानां ॥ 2 ये स्वतंत्रं आकार्यंते ॥ 3 एते सर्व्वेऽपि तेन एकमताः संति यत् इच्छजदः स्वहस्तेन लिखितं मूशाय ददौ ॥ 4 यत् यथा संपूर्णं अजयत्वं सर्व्वदुष्टत्वात् प्रभूताच्च यदंतः स्वल्पे प्रबोधाय युष्माकं अत्र प्रकटयामः ॥ ॥

5 ब्रूते मूलागमेन ॥ 6 यत् प्रथमं आसीत्

[1] Both ..., but see S. [2] JJ ... [3] Both om.

पृथ्वी या पयोरुधिरा विस्तीर्णा तमिस्रंच उदकंच कृष्णं[2] ॥ 7 लोचनाभ्यां इञ्जदः उपरि ह्रदे तस्योदकस्य कृष्णस्य सदैव पश्यति ॥ 8 पश्चात् इञ्जदः उक्तवान् यत् भूयात् रोचिः ॥ 9 समुद्भूताच रोचिः ॥ 10 असौ अधोऽधोमुखः[3] समीहे[4] तां रोचिषं ॥ 11 असौ विवेज रोचिषं दिने तमिस्रंच निशायां ॥ 12 असौ षड्भिश्च दिनैः समारचत्[5] इदं जगत् आकाशंच जगद्वींच ॥ 13 यतः अंतः सप्तमे अह्नि विश्रामः समाधानंच बभूव ॥ 14 तेन सर्व्वरहस्यतया[6] जुहूदानां दिने शनैश्चरीये विश्रामि ॥ 15 इदंच यत् आदमं नारींच निजां हव्यानाम्नीं[7] आरचत्[5] ॥ 16 अंतश्च उद्याने स्वर्गलोकस्य चकार ॥ 17 किल आदमः अंतस्तत्र उद्याने कृषिं करोतु प्रहरकेणच निपातु ॥ 18 आदीनः स्वयं इञ्जदोऽस्ति आदमाय अवोचत् ॥ 19 यत् सर्व्वेभ्यो वृक्षेभ्यो ये अंतरस्मिन् उद्याने भक्षेः ऋते तस्मात् वृक्षात्

---

[1] Both ›, but see S. [2] JJ तमिस्रं. [3] Both have खां for खः. [4] So both always. [5] So both, see ch. xi, 51. [6] ननुच seems wanting. [7] Both add ए to हव्यना, but see §§ 35–37, 41, 106.

यो ज्ञानस्य ॥ 20 यतश्चेत् एतस्मात् खादिष्यसि मरिष्यसि ॥ 21 असौ पश्चात् सर्प्पमेकं अंतः उद्याने चकार ॥ 22 सच सर्प्पो हउआं[2] विप्रततार उक्तवान् यत् एतस्मात् वृक्षात् चिनु भक्षाम[3] आदमायच ददाम[3] ॥ 23 साच इत्येवमकरोत् ॥ 24 आदमोऽपि सर्व्वं तथैव अखादत् ॥ 25 ज्ञानंच एवं समुत्पन्नं यदेते विवेजुः शुभं अशुभात् नच मृताश्च[4] ॥ 26 एतैर्दृष्टं परिज्ञातं यत् विनग्नाः संति ॥ 27 अधस्तात् वृक्षस्य गुप्ताः बभूवुः ॥ 28 एते पत्रैश्च[5] वृक्षस्य स्वीयं वपुः समावृण्वन् लज्जया विनग्नत्वस्य ॥ 29 पश्चात् आदीनः उद्याने समाययौ आदमंच नाम्ना समाकारयत् यत् क्वासि ॥ 30 आदमश्च प्रत्युत्तरं ददौ यदयं अस्मि अधस्तात् वृक्षस्य इति हेतोः यतो विनग्नोऽस्मि ॥ 31 आदीनश्च क्रोधं चक्रे ॥ 32 उक्तं यत् केन परिज्ञातं ते[6] यत् विनग्नोऽसि ॥ 33 मा कदाचित् त्वया तस्मात् वृक्षात् ज्ञानस्य[7]

---

[1] S indicates ꝛ७ · ...ꝛ७ꝛ७, as in § 139; but ꝛ७ꝛ७ ꝛ७ is good Pahlavi. [2] JJ हउयां, JE हउयायां. [3] Both have म: for म. [4] Both मृत्याश्च. [5] JE पात्रैश्च. [6] JE om. [7] Both om.

यस्मादस्माभिरुक्तं यत् मा भक्षेः भक्षितं ॥ 34 आदमश्च उवाच यत् अनया नार्या या त्वया मे दत्ता विप्रतारितोऽहं अखादं ॥ 35 आदीनश्च हउआं अपृच्छत् यत् त्वमपि किमिति एवं चकृषे ॥ 36 हउआच उवाच यत् अनेन सर्प्पेण विप्रतारिताहं ॥ 37 असौ आदमं हउआंच सर्प्पंच त्रितयमपि शापेन स्वर्गोद्यानात् बहिश्चक्रे ॥ 38 असौ आदमाय अवोचत् यत् ते खाद्यं आस्तरणेन निद्रायाः श्वासेनच नासिकायाः भूयात् ॥ 39 यावत् निश्वीर्णं ते जीवितस्य ॥ 40 तवच पृथिव्यां सञ्चं मूतं पुरीषंच प्रवहतु ॥ 41 असौ हउआयैच अवोचत् यत् ते गर्भो दुःखेन विषादत्वेन जननिश्च ते महोपतापत्वेन भूयात् ॥ 42 असौ सर्प्पायच अवोचत् यत् मध्ये चतुष्पदानां मृगाणां अरण्यीयानां पार्श्वतीयानांच गर्हितो भव ॥ 43 तेच पादाः मा भवंतु ॥ 44 तेच प्रवृत्तिः उदरेण खाद्यंच पांशुभूयात् ॥ 45 मध्येच जातकानां ते समं कलत्वेण द्वेषो

[1] Both om.

दुष्टंच मानसत्वं एवं भूयात् यत्[5] तेषां जातकानां शिरांसि खादेत् ॥ 46 इदंच वदंति यदिदं जगत् समं सकलेन केनचित् अंतः सर्व्वस्मिन् कस्मिंश्चित् मनुष्येभ्यः कृतं दत्तंच ॥ 47 असौ मनुष्यं उपरि सर्व्वासु सृष्टिषु दातिषु सार्द्रे शुष्केच राजानं चकार ॥ ॥

48 ननु ब्रवीमि किंचित् उपरि अंतश्च एतेषां प्रलापस्य कुत्सिततायांच एतेषां वाचि ॥ 49 यत् सा पृथ्वी या पयोरुधिरा विस्तीर्णा तमिस्रंच इक्षजदश्च अस्यच चक्षुषी उदकंच कृष्णं क्व केन सोम्ना आसीत् ॥ 50 अथवा स्वयं इक्षजदश्च केन प्रकारेण आसीत् ॥ 51 प्रकटंच यत् न रोचिष्मान् आसीत् ॥ 52 यतश्चेत् रोचिषं ददर्श ॥ 53 तस्मात् यत् न दृष्टा आसीत् अधोमुखं समीहे ॥ 54 चेत् वदंति यत् तमोमान् आसीत् तत् परिस्फुटमेव यत् तमोमूलं वचः शिक्षापनायाः रोचिष्मत्याः अस्ति ॥ 55 चेत् वदंति यत् न तमोमान् किंतु रोचिष्मान् आसीत् ॥ 56 तच्चेत् स्वयं रोचिष्मान् आसीत् किमिति

[1] Perhaps better ۶. [2] Both omit, but see §§ 6, 64. [3] JJ ۳۰۹, JE ۳۰۳; but see S. [4] Both ۲۰۱۵. [5] JE om.

यत् रोचिषं ददर्श सचमत्कारं समीहे ॥ 57 चेत् वदंति यत् न रोचिष्मान् आसीत् न तमोमान् ॥ 58 तत्रेषां तृतीयं प्रकटयितुं युज्यते यत् न रोचिष्मान् नच[1] तमोमान् ॥ 59 अन्यथा तु यस्य स्थानं निवासश्च अंतस्तमसि उदकेच कृष्णे आसीत् येनच सदैव रोचिः न दृष्टा आसीत् स रोचिषं दृष्टुं कथं शशाक ॥ 60 अस्य इअजदत्वं कस्मात् ॥ 61 यतो ननु सर्व्वोऽपि यः अंतस्तमसि निवसति स रोचिषं दृष्टुं न शक्नोति ॥ 62 इदंच यच्चेत् मूलं निवासश्च तमिस्रमासीत् ततः प्रत्यभिमुखं रोचिषं स्यातुं कथं शशाक ॥ 63 यतः इदं प्रसिद्धमेव यत् तमिस्रं प्रत्यभिमुखं रोचिषं स्यातुं न शक्नोति यतः प्रतिस्खल्यते प्रच्छादयतेच ॥ 64 द्वितीयंच इदं यत् सा जगती या पयोरुधिरा विस्तीर्णा सीमावती आसीत् किंवा निःसीमा ॥ 65 चेत् सीमावती आसीत् ततो बहिरस्याः किमासीत् ॥ 66 चेत् निःसीमा आसीत् ततो

[1] JJ om. च.

[illegible]

निःसीमत्वं च्च यथौ ॥ 67 किल यथा सदैव पश्यामः इयं जगती जगच्च न तत् यत् आद्यमस्ति ॥ ॥

68 तच्च यत् आदीनेन उक्तं ॥ 69 किल भूयात् रोचिः समुद्भूताच ॥ 70 पश्चात् परिज्ञातुं युज्यते यत् आदीनः प्राक् तस्मात्[3] रोचिर्बभूव ॥ 71 चेत् रोचिषं सदैव समीहे[4] कर्त्तुं असौ आदेशंच संभवने ददौ पश्चात् मनसा अमंस्त यत् रोचिः केन प्रकारेण सुरूपा भविष्यति किंवा दुष्टरूपा ॥ 72 चेत् रोचिः स्वीययथास्थतया अंतर्ज्ञाने स्मरणेच आदीनस्य अभीप्सिता तत् परिस्फुटमेव यत् रोचिः सदैव आसीत् सर्व्वत्र अंतर्ज्ञाने मनसिच आदीनस्य ॥ 73 सर्व्वत्रच बहिरेतस्मात् ॥ 74 यतः किंचिदपि न शक्यते परिज्ञातुं अभीप्सितुंच विना सज्ञायाः प्रकटत्वेन ॥ 75 चेत् रोचिः सदैव आसीत् ततः आरचितं आदीनस्य अस्ति ॥ 76 चेत् वदंति यत् रोचिः स्वीययथास्थतया अंतर्ज्ञाने

---

[1] JJ १). [2] -अ seems wanting. [3] यत् seems wanting. [4] So always.

नासीत् ततः रोचिषं समीहे यान्न विवेद यत् केन प्रकारेण अतीव अज्ञानतरः ॥ 77 अथवा कथं शक्यते तत् यत् न कदाचित् मतं ज्ञातंच मनसा अवमंतुं ॥ ॥

78 इदंच यत् तमादेशं यं संभवनेन रोचिषः कस्यचित् ददौ किंवा न कस्यचित् ॥ 79 यतः इदं अवितर्क्यमेव यत् आदेशं आदेशकरे शक्यते दातुं ॥ 80 चेत् सत्तायै ददौ या रोचिष्मती ततो रोचिष्मान् स्वयं आसीत् ॥ 81 चेच्च आदेशं असत्तायै ददौ ततोऽसत्ता आदेशं आदीनस्य कथं अशृणोत् ॥ 82 अथवा कथं विवेद किल आदीनस्य एवं कामो यत् रोचिष्मती भवामि ॥ 83 यतोऽसत्ता आदेशं आदीनस्य सर्ब्बे एवं न शुश्राव यथा किल न ददौ ॥ 84 यतोऽसत् केनापि प्रकारेण अवमंतुमपि न शक्यते ॥ 85 तच्च यत् असत् विनिर्म्मितं किल असत् अस्ति ज्ञानिनः[2] पुरो दृष्टेश्च बभूव येनच परिज्ञातं किल आदीनः

[1] Both ल्ह्ग्, but see S. [2] Both om. नः.

केन प्रकारेण सदैव समीहते किल भवामि तेन प्रकारेण येन समीहितं समुद्भूतंच ॥ 86 चेत् वदंति यत् रोचिर्वीचः आदीनस्य समुद्भभूव यत् उक्तं किल भव समुद्भूताच ॥ 87 तच्चेत् आदीनोऽस्य स्वताच तमोवती आसीत् अनेन कदाचित् रोचिर्न दृष्टा आसीत् तत् रोचिर्वीचः केन प्रकारेण शक्नोति भवितुं ॥ 88 यतः इदं प्रसिद्धमेव यत् वाचो जननिर्मनोऽस्ति ॥ 89 चेत् वदंति यत् वाक् रोचिष्मती आसीत् ततः अतीव अद्भुतं यतः[8] पश्चात् रोचिः फलं तमसः तमश्च बीजं अस्य रोचिश्च चिह्नं अथवा इदं यत् रोचिः अंतस्तमसि पिहिता आसीत् ॥ 90 यथाहं अवोचं किल आदेशं विना आदेशकरेण दातुं न शक्यते परिस्फुटमेव ॥ 91 यत् तत्कालं रोचिः समुद्भभूव पश्चात् आदेशंच अनुरूपे ददौ ॥ ॥

92 द्वितीयंच इदं यत् एनां सृष्टिं दातिंच[9] आकाशंच

---

[1] Both insert ›, perhaps for ›. [2] Both insert ›, but see S. [3] JJ ›.
[4] Both ›. [5] Both insert ›. [6] In § 79. [7] Pl. ›. [8] Both यत्.
[9] JJ om. च.

पृथ्वींच किमिति मध्ये षड्दिनानां समारचत्[2] ददौ ॥ 93 सप्तमेच विश्रांतः श्रतस्मात् ॥ 94 तच्चेत् इदं जगत् न कस्माच्चित् ददौ किंतु केवलं आदेशात् समुद्भभूव किल भव समुद्भूतंच ॥ 95 तत् षड्दिनदीर्घत्वं कस्मात् ॥ 96 यतो यस्य कष्टं केवलं श्रतावन्मात्रं भवति यावन्मात्रं भवेति उक्तेन तस्य षड्दिनदीर्घत्वं संजातमिति भूरि विसदृशं ॥ 97 अस्य कष्टंच श्रतस्मात् न युज्यते भवितुं ॥ 98 चेत् असत् सत् कर्तुं शक्नोति शक्रश्च विना दीर्घत्वेनच दातुं शक्नोति ॥ 99 चेत् विना दिनेन कालं दातुं अशक्नः ततोऽसत्तायाः दत्तमिति वक्तुमपि न युज्यते ॥ 100 द्वितीयंच इदं यच्चेत् गणना दिनानां सूर्यात् परिज्ञायते ततः पूर्व्वं आरचनात् सूर्यस्य दिनसंख्या नामच दिनानां कस्मात् परिज्ञायते ॥ 101 यतो वदंति यत् सूर्यं दिने चतुर्थे स्वयं चतुःशनैश्चरीये ददौ ॥

---

[1] JE [illegible].

[2] So both, see ch. xi, 51.

102 इदंच यत् दिने सप्तमे समाधानं विश्रामंच कस्मादियेष कर्त्तुं ॥ 103 चेत् आरचनेन दानेन जगतः दीर्घत्वं कष्टंच एतावन्मात्रं बभूव यावन्मात्रं उक्तं यत् भव ॥ 104 ततो दिनं कथं गण्यते किल विश्रामं इयेष कर्त्तुं येन कष्टं विजीर्यते ॥ 105 यतश्चेत् भवेति तत्कालेन उक्तं[1] ततः कष्टंच समाधानंच तत्कालमेव युज्यते भवितुं ॥ ॥

106 द्वितीयंच इदं यत् आदमं समं हउन्नया किमर्थं कस्मै हेतवे ददौ ॥ 107 यच्चेत् कामं समाचरंति तत्किमिति एवं न ददौ यदस्य कामकारित्वात् न विपर्ययेति ॥ 108 यतश्चेत्[2] पूर्व्वं कर्म्मणोऽजानीत यत् आदेशश्रोतारो न भविष्यंति असौ निदानेच ददौ तन्नु विलक्षीभवितुं क्रोधंच उपरि तेषां कर्त्तुं निरर्थकं ॥ 109 यतः परिस्फुटमेव यत् स्वयं आदीनः संपूर्णप्रवृत्तो नासीत् निजेन कामेन काम-

[1] JJ उक्तः. [2] Both यच्चेत्.

वान् निजे कामेच प्रतिद्वंद्वी प्रतिघातीच प्रकटः ॥ 110 चेत् पूर्व्वं कर्म्मणो नालोकत असौ नचाजानीत यत् आदेशमस्य न अविष्यंति[2] पश्चात् अज्ञानोऽशुभावलोकीच अस्ति ॥ 111 चेत् वदंति यदस्य स्वकामोऽकरणेन आसीत् तत् पश्चात् आदेशं करणेन किमिति ददौ ॥ 112 अस्यच अकरणेन किं पापं कथंच प्रचरति ॥ 113 अश्वंच यं रशनाभरेण[3] नियोजयंति तंच चर्म्मलतया उत्तापयंति ॥ 114 एतस्मात् वाक्यात् साभिज्ञानं लक्षणं विप्रतारकाणां प्रकटायते ॥ 115 येषां कामः आदेशश्च अन्योन्यं विरोधी अननुरूपश्च ॥ 116 चेत् कामो रुचितंच[4] इदं आसीत् यत् कामात् न विपर्ययंति ॥ 117 तन्नतु प्राणो रुचितंच तेषां विपर्ययेणास्य कामात् भूरि बलवत्तरं प्राधान्यवत्तरंच तस्मात् योऽस्य अविपर्ययेण ॥ 118 चेत् कामः तेषां विपर्ययेणास्य

---

[1] Better [illegible]. [2] So both. [3] JJ has रग्ना, and JE रंग्ना, for रश्मा instead of रशना. [4] JE om. च.

कामात् ज्ञानाच्च तस्यासीत् असौ आदेशमेव अविपर्ययेण ददौ तत्रनु वराकः आदमः कथं शक्नोति यत् न विपर्ययंति ॥ 119 अस्य मूलसृष्टिश्च न युज्यते भवितुं ॥ 120 यतो विपर्ययेण[3] आदेशात् केवलं आदेशो दुष्यते अविपर्ययेण तु कामो ज्ञानंच द्वितयमपि द्रोहितं भवति ॥ ॥

121 द्वितीयंच इदं यत् तत्[4] उद्यानं समारचत्[5] किमर्थं कस्मै लाभायच ददौ ॥ 122 स्वयंच वृक्षं ज्ञानस्य यः आदिष्टो यत् मा भक्षेः असौ निरोपंच अखादनेन चक्रे तमारचितुं किमिति समीहे ॥ 123 अस्य निरोपात् आदेशाच्च परिस्फुटमेव यत् किंचिज्ज्ञानत्वं अज्ञानत्वंच मिश्रितरं ॥ 124 कामश्च तस्मिन् प्रभूतो ज्ञानात् ज्ञापनत्वाच्च ॥ 125 अस्य लाभश्च अज्ञानत्वात् भूरिरासीत् ॥ 126 यतो यावदेते वृक्षं ज्ञानस्य अखादंतः

---

[1] So both, but S indicates . [2] JE , S om. [3] अस्य seems wanting. [4] JE om. [5] So both, see ch. xi, 51.

आसन् अज्ञानाश्च समभवन् अंतरस्य अकृतादेशे अशुभेच नो ॥ 127 यथैते ज्ञाने समुत्पन्ने अंतरकृतादेशे बभूवुः ॥ 128 असौ अज्ञानत्वात् तेषां विषादितो नाभूत् यथैषां ज्ञानात् बभूव ॥ 129 उपरि एषां विलक्षः कोपालुश्च बभूव ॥ 130 असौ महदशुभत्वेन अवज्ञभत्वेनच स्वर्गलोकात् बहिश्चक्रे भूमौच न्यपातयत् ॥ 131 संक्षेपात् इदं यत् इदं ज्ञानोत्पत्तेर्मनुष्याणां अंतर्जगति कारणं सर्प्पात् विप्रतारणत्वात् बभूव ॥ 132 इदंच वदंति यत् सर्व्वं किंचित् मनुष्येभ्यः आरचत्[1] ततः परिस्फुटमेव तमपि वृक्षं मनुष्येभ्यः समारचितं ॥ 133 असौ मनुष्यं सकलासु सृष्टिषु दातिषु राजानं चकार ॥ 134 चेत् इत्येवं तन्नतु तस्मात् वृक्षात् योऽमीषां स्वाधीनोऽभूत् कामविध्वंशनं किमिति ॥ ॥

135 एतस्मात् वाक्यात् इदंच प्रकटं यदस्य

[1] So both; see ch. xi, 51.

[illegible] 136 [illegible]

[illegible][1] [illegible]

[illegible] 137 [illegible]

[illegible] 138 [illegible][2] [illegible]

[illegible] 139 [illegible][3] [illegible]

[illegible] 140 [illegible]

[illegible][4] [illegible]

[illegible] 141 [illegible]

[illegible] 142 [illegible]

स्वल्पमपि ज्ञानं नाभूत् ॥ 136 यतश्चेत् उद्याने समागतोऽसौ शब्दं चकार आदमंच नाम्ना समाकारयत् यत् क्वासि एवं यथा किल क्व स्थाने सत्ता इति अवेत्ता आसीत् ॥ 137 चेत् अप्रत्युत्तरो जातोऽभविष्यत् क्व स्थाने सत्ता आदमस्येति अवेत्ताभूत् ॥ 138 चेत् अस्य शब्दः पुरो दुष्टेनाभूत् किल तस्मात् वृक्षात् अखादन् किंवा नो इदंच यत् कः कयं कश्च अखादत् कश्च विप्रतत्तार इति अवेत्ताभूत् ॥ 139 यतश्चेत् वेत्ता आसीत् ततो[5] मा कदाचित् त्वया तस्मात् वृक्षात् यस्मादस्माभिः समादिष्टं यत् मा भक्षेः भक्षितमिति प्रश्नकरणं किमिति ॥ 140 तथा प्राक् यत् समागतः न विलक्षोऽभूत् पश्चात् चेत् परिज्ञातं उपर्येषां विलक्षो बभूव कोपालुश्च बभूव ॥ 141 अस्य किंचिज्ज्ञानत्वंच एतस्मात् यत् सर्व्यं यं आत्मप्रतिद्वंद्विनं समारचत्[6] समं तैश्च उद्याने चकार ॥ 142 अथवा किमिति उद्यानं

---

[1] Both [illegible]. [2] JE [illegible], perhaps for [illegible]. [3] S indicates [illegible]. [4] S om. [5] JJ° तत्. [6] So both, see ch. xi, 51.

[illegible]

एवं सप्राकारं नाकरोत् यत् सर्प्योऽन्योऽपिवा[2] दुष्टमनाः तत्रांतर्नै प्रयाति ॥ 143 अस्य अलीकत्वंच एतस्मात् प्रकटं यदुक्तं किल चेत् एतस्मात् वृक्षात् खादिष्यसि मरिष्यसि एतेच अखादन् परं न मृताः किंतु ज्ञानवंतश्च बभूवुः ॥ 144 एते शुभं अशुभात् विवेजुः ॥ ॥

145 इदंच यत् कथं विरोधि द्वंद्विच ज्ञानंच समं कामेन आदेशनेच ॥ 146 यतश्चेत् इयेष[3] खाद्यं तस्मात् वृक्षात् असौ आदेशंच अखादनेन ददौ ज्ञानंच तेन समुद्बभूव यत् खादितं ॥ 147 तन्ननु प्रकटमेव द्वितयमपि अन्योन्यं विरोधि कामो ज्ञानंच आदेशश्च ॥ 148 इदंच यत् किल आदमः पापं चक्रे शापश्च यः कृतः उपरि सर्व्वेषु मनुष्येषु युगे युगे प्राप्नोति अन्यायतया ॥ 149 सर्व्व-प्रकारतया यत् समालोचामहे अचेतनोऽज्ञानो ग्रहिलवाक्च ॥ 150 अनेन संबंधेन दीर्घत्वात् इदं एतावदेव पूर्णमोहितं ॥ ॥

---

[1] JJ ६, JE om. [2] Both ऽविपा. [3] Both इयेपा.

CHAPTER XIV.

CHAPTER XIV.

1 मे कामः किल किंचित्तरं सर्व्वस्मादसंबंधत्वात् संपूर्णादशुद्धित्वात् सर्व्वागमानां संलिखामि ॥ 2 यत् पूर्णं सर्व्वपापत्वात् देवत्वाच्च सहस्रादेकं यत् तेभ्यः प्रकटं संक्षेपेण निगदामि ॥ 3 तैश्च समादिष्टं निरीक्ष्य ॥ ॥

4 आदौ इदं यदुद्गिरति उपरि निजे यथास्थत्वे ॥ 5 यदहं अस्मि आदीनो द्वेषकांक्षी ॥ 6 द्वेषशोचयिताच ॥ 7 द्वेषंच सप्तत्वैयत्यं[5] जातकेषु शोधयामि ॥ 8 मे मूलद्वेषो न विलीयते ॥ 9 अन्यस्मिन् स्थानेच निगदति यत् अभीप्सितः क्रोधो गरिष्टंच मनः ॥ 10 अस्योष्टः संपूर्णविषः ॥ 11 जिह्वा यथा वह्निर्ज्योतिष्मान् ॥ 12 लोचनं यथा स्रोतः[6] सरत्प्रवाहः ॥ 13 अस्याघोषः आक्रंदोपमो देवाघोषतुल्यतरश्च ॥ 14 अस्य सन्निवेशनं अंतस्तमसि[7]

---

[1] JE adds [illegible]. [2] Both om. [3] JE om. [4] Better [illegible].
[5] JJ सप्तात्वयीयं, JE सप्तात्वेयीयं. [6] Both श्रोतः. [7] JJ अतसमसि, JE अंतसमसि.

धूमलत्वे अभ्रेच ॥ 15 अस्य वाहनं वायुर्यः शोषकः ॥ 16 अस्य प्रवर्त्तनात् पादयोः पांशुभ्रमः समुदेति[4] ॥ 17 चेत् प्रचरति ततः पश्चात् उत्थानं अग्नेः ॥ 18 अन्यच्च उपरि क्रोधत्वे निजे निगदति ॥ 19 यत् चत्वारिंशत् वर्षाणि उपरि असरासरेषु कोपेन अभूवमहं ॥ 20 अनेन उक्तं यत् विमुग्धचेतसः संति असरासराः ॥ 21 अन्यच्च निगदति यत् योऽस्ति दरिद्री चेत् दासो मे ॥ 22 यश्च ऋद्धः आराधको यं सदैव संसृजामि ॥ 23 योऽस्ति दरिद्री यथा राजा प्रकटंच यत् राजा तेषां स्वयं आदीनः ॥ 24 अन्यच्च इदं निगदति यत् आराधकाः अग्नेः विमुग्धाः संति ॥ 25 इदंच यदस्य कर्म्म धूमं अंगारकान् समुद्वहति ॥ 26 युद्धंच रक्तं प्रवाहि ॥ 27 इदंच यत् मनुष्यं रक्तं उपरि द्वितीये उत्सारयामि ॥ 28 उपर्याकाशे सन्निविशामि उपर्येषामंगेपुच ॥ 29 इदंच यदसौ एकया निशया शत-

---

[1] JE -सरासरेषु. [2] JE -दरिद्रस्य. [3] JE om. [4] Both समुहेति.

षष्टिसहस्राणि समूहात् सैन्यात् माजंदरीयाणां निकृष्टेन मृत्युना निजघान ॥ 30 अन्यस्मिंश्च समये षट्शतसहस्राणि मनुष्याणां विना नारीभिः डिंभैश्च अपूर्णैनरैः असरासरेभ्यः अंतः शून्ये निजघान ॥ 31 विना द्वाभ्यां मनुष्याभ्यां यौ अशुधतां[2] ॥ ॥

32 द्वितीयमपि निदर्शयति यत् निर्द्वीणकाले सकलमपि पश्चात्तापत्वं ॥ 33 यथा इदं यदुद्गिरति यत् जरीगाः[3] यावत् बभूवुः नेच उवाचुः यत् पश्चात्तापिनः स्मः करणेन मनुष्याणां जगत्यां ॥ 34 इदंचोद्गिरति यत् उपरि आसने सन्निविशति यं चत्वारो गणाः[4] उपरि स्कंधे धरंति येभ्यः शिलाभारात् एकैकशो नदी ज्वलनीया सदैव प्रवहति ॥ 35 ननु चेत् असौ अदृश्योऽस्ति न तनुकृतः ततस्तेषां चतुर्णां वराकाणां लघूनां महाभारः कष्टधारणेन किं ॥ 36 द्वितीयंच इदं यत् सर्व्वेषु दिनेषु

---

[1] S indicates · *ꬱꬰꬱꬰ. [2] Both अशुतां, as if a letter had been illegible in their original. [3] Transcription of the imperfect Pz. [4] Both गुणाः.

स्वीयेन हस्तेन नवतिसहस्राणि आराधकानां समारचति[3] एनंच यावत् निशावसानं सदैव समाराधयंति अमून् पश्चात् स्रोतसा ज्वलनीयेन नरके समुत्सृजति ॥ 37 चेत् दृष्टो बलात्कारी अनाचारीच अनेन प्रकारेण कार्ये पुण्येच सुकर्म्मत्वेच संसारिणां भवितुं कथं संयुज्यते ॥ 38 चेच्चासौ[4] वराकान् आराधकान् भक्तिशीलान् आदेशग्राहिनः निर्म्मलकर्म्मिणः सह अपरैः पापकारिभिः नरके अनंतकालीये अवकिरति ॥ 39 यथा[5] तच्च यत् अपरे समुदायीकाः समुज्झिरंति यत् इञ्जदो दिने शवोत्थानीये सूर्यं चंद्रंच सह अपरैः पापकारिभिः नरके ददाति तेन हेतुना यदस्ति मनुष्यैः तेषां प्रणामः सम्मुखं कृतः ॥ ॥

40 अन्यस्मिन् स्थाने इदं निगदति यच्चेत् मेहादरो[6]ऽब्राहीमो मित्रः आदीनस्य लोचनव्यथापीडितः ततः स्वयं आदीनः प्रच्छन्नत्वे समाययौ ॥ 41 अस्योच्छीर्षकेच[7]

---

[1] Both insert ›, but see S. [2] JE om. [3] So both, see ch. xi, 51. [4] Or यतश्चासौ; both having यतेचसौ. [5] JJ तथा. [6] Transcript of Pz. [7] JJ om. च.

उपविवेश कुशलंच पप्रच्छ ॥ 42 अब्राहीमः आसीनकं यमस्य सहोदरं पुत्रं प्रच्छन्नतया आकार्य अवोचत् ॥ 43 यत् स्वर्गे प्रयाहि मधुं लघुतरं पवित्रतरंच समानय ॥ 44 गतोऽसौ समानीतश्च ॥ 45 अब्राहीमश्च प्रचुरां प्रार्थनां आदीनाय चकार ॥ 46 यत् अंतर्गृहे मे मधुं क्षणेन[7] भक्ष ॥ 47 आदीनश्च प्रत्यवोचत् यत् न खादामि यतो न स्वर्गात् नच पवित्रतरः ॥ 48 पश्चात् अब्राहीमः साक्ष्यं ददौ यत् पवित्रोऽयं मधुः स्वर्गात् आसीनकेन मत्पुत्रेण समानीतः ॥ 49 पश्चात् आदीनः असंशयत्वात् यत् आसीनकेन साक्षित्वात् यत् अब्राहीमेण मधुं क्षणेन[8] अखादत् ॥ 50 पश्चात् चेत् प्रयातुं समैहत न विनिर्मुक्तो यावत् असौ शपथैर्बहुभिः एकं द्वितीयं अखादत् ॥ 51 पश्यत एनं संपूर्णं अशुद्धं प्रलापं यं एकमपि इञ्जदे न योग्यं ॥ 52 यथा समागमनं

---

[1] Both ...... [2] Both om. [3] JE om. [4] Both ....., but see S.
[5] S neglects. [6] Always mas. [7] Doubtful; JJ मधून् तृन्, JE मधून् क्षन्, both here and in § 49. [8] See § 46.

यदस्य तनुमत्तया गृहे अत्राहीमस्य अन्नखादनंच मधुखादनंच[1] यदस्य एकमपि सम्मुखं नानुरूपायते ॥ 53 इदंच एतस्मात् प्रकटं यत् तत् दुःखं यत् अत्राहीमस्य न[5] आदीनात् समुद्भूव सृतेऽन्यस्मात् कर्त्तुः ॥ 54 अस्य वैकल्यंच ज्ञानात् अचैतन्यंच एवं समुद्भूव यदसौ पवित्रत्वं कस्माच्च मधुरिति न विवेद ॥ 55 अस्य अनृतत्वंच इदं यदसौ न खादनाय मधोः उवाच निदानेच खादितः ॥ 56 पश्चाच्च मुनिश्चितीकृतो यत् निर्म्मलः पवित्रश्च आस्ते ॥ 57 नन्वसौ यस्येदं यथास्यत्वं इअजदत्वेन सर्व्वज्ञानिना सर्व्वशक्तिना समाराधितुं[6] कथं युज्यते ॥ ॥

58 अन्यस्मिन् स्थानेच निगदति यत् अभूत् एको रोगिभ्यो यः समं स्त्रीयैः कलत्रजातकैः अतीव दुःखितो दुर्बलश्च अपेतद्वीरभूत् ॥ 59 सर्व्ववारं नमस्करणे नक्ते आराधनायांच इअजदस्य अतीव व्यवसायी कर्त्ताच अभूत् ॥ 60 असौ

---

[1] JE om. [2] Both ـسا. [3] S indicates وادسكوسادم; possibly وادسكوسادم.
[4] JE inserts ؏, but see S. [5] Both om. [6] So both.

एकस्मिन् दिने अंतर्नमस्करणे गुप्तमभीप्सितमयाचत यन्मह्यं समृद्धत्वमर्थेन देहि ॥ 61 मेच जीवितं समाधानितरं भूयात् ॥ 62 अस्यच गणैकः उपरिष्टादधः समाययौ उवाचच यत् तुभ्यमर्थः एतस्मात् बहुः चक्रपादे[3] इञ्जदेन न विभक्त आस्ते ॥ 63 नूतनाच्च विभक्तुं न शक्यते ॥ 64 परं मया तुभ्यं प्रसाददानेन पूजायाः प्रणामस्यच आसनमेकं यस्य चत्वारः पादाः रत्नात् अंतः स्वर्गे दत्तमास्ते ॥ 65 चेत् रोचते तत् तुभ्यं तस्मात् आसनात् एकं पादं ददामि ॥ 66 सच आराधकः शिक्षापकः तस्मात् यत् स्वीयं कलत्रं प्रार्थयत् ॥ 67 कलत्रं अवोचत् यन्मे किंचिन्नरेणापि अर्थेन दुःखितेनच जीवितेन इहलोकतया संतोषी भवितुं उत्तमं ॥ 68 यच्चेत् मे स्वर्गलोके मध्ये सहायिनां आसनं त्रिपादं ॥ 69 चेत् शक्नोषि तन्मह्यमर्थं अन्यस्मात् स्थानात् समादेशय ॥ 70 पुनः स गणः समागत्य निजगाद

---

[1] JJ ગામ્. S om. [3] JE adds न in margin.

[illegible]

यच्चेत् चक्रं विघटयामि आकाशंच जगतींच नूतनत्वात् ददामि प्रवृत्तिंच तारकाणां नूतनत्वात् समारचामि[7] ददामिच तस्मादूर्ध्वमपि न प्रकटं यत् तुभ्यं भाग्यं उत्तमं निपतति किंवा निकृष्टं ॥ 71 एतस्मात् वाक्यात् एवं प्रकटं यत् न स्वयमसौ अस्ति विभक्ता अर्थस्य भाग्यस्यच ॥ 72 विभंजनमपि[8] न कामेनास्य भाग्यंच व्यस्तयितुं न शक्नोति ॥ 73 परिभ्रमणंच चक्रस्य सूर्यस्य चंद्रस्य तारकाणांच नांतः प्रवर्त्तितं ज्ञाने कामे आदेशेचास्य ॥ 74 इदंच यत् आसनं यत् निवेदितं यत् अंतः स्वर्गे ददामि न कर्म्मणो दानाच्चास्य ॥ ॥

75 अन्यस्मिन् स्थानेच उपरि प्रलापे निजे निगदति ॥ 76 यदहं सह संधातेन पापकारिणां कियतोऽप्यसंख्यान् अपापान् निजघान ॥ 77 यदिच आराधकैः निःकारणकर्म्मत्वं प्रभूतैः उक्तं तदसौ उवाच यदहं अस्मि

---

[1] S om. [2] JE om. [3] Both om. [4] Better insert ऽ. [5] Both [illegible], but see S. [6] JJ om. [7] So both, see ch. xi, 51. [8] Ends with नोपि in JJ, and नाच in JE.

आदीनः कामराजा ॥ 78 उत्कटतरोऽप्रतिपक्षः कामकारी कोऽपि न समर्थीयति उपरि मत्प्रलापे वक्तुं ॥ ॥

79 विस्फोतं प्रभूतं प्रलापं यत् पूर्णाशुद्धितया अस्माकं लिखितुं प्रलंबतरं प्रतिभासितं ॥ 80 योऽवलोभ्रा व्यस्ताचारः एतस्मात् वाक्यात् तस्मै वाक्स्वतंत्रस्य गुरोर्भूयात् ॥ 81 यावत् भवति सुप्रबुद्धो यथास्थत्वात् सर्व्वागमानां सत्याच्च तस्मात् यदस्माभिरुक्तं ॥ 82 ननु चेत् स इञ्जदो यस्येदं साभिज्ञानं लक्षणंच[5] ततः सत्यं एतस्मात् दूरे ॥ 83 प्रतिपालनंच एतस्मात् बहिस्तरं ॥ 84 अस्य ज्ञानत्वंच उपरि न विभक्तं ॥ 85 यतोऽयं स्वयं अस्ति दूनो यो नरकाधिपतिः तिमिराकरः तमोबीजः ॥ 86 यस्य व्यामुग्धाः देवत्वदुष्टाः आदीननाम्ना स्तुवंति प्रणामंच कुर्व्वते ॥ 87 उपरि एतस्मिन् पदे अत्र परिपूर्णं ॥ ॥

---

[1] Both have ⟨ for ⟩. [2] Better ⁂. [3] JE, S om. [4] Both insert ⟩. [5] Both omit च.

CHAPTER XV.



CHAPTER XV.

1 अन्यच्च उपरि अनिबद्धत्वे निःसीम्नि वाक्ये निरलंकारप्रतिवादे तशीप्रबोधिनां स्तोकं किंचित् प्रकटयामि ॥ 2 यतो यथा त्वयोऽपि एकस्मात् मूलात् जुहूदतायाः ॥ 3 तच्चेत् अंतः एकस्मिन्नुक्तं ततस्ते सर्व्वेऽपि ऐक्यसहायतया अशुद्धस्वाधीनाः ॥ 4 अहो पश्येत यत् मूलदर्शनं तशीकजातीनां कस्मात् मूलात् समाययौ ॥ 5 यत् अंतः[1] हुरुशर्म्मग्रामे सर्व्वजुहूदेभ्यो योपिदेका दुश्चारितया प्रसिद्धा आसीत् ॥ 6 गर्भश्च तस्यां प्रकटीबभूव ॥ 7 यदिच ते पप्रच्छुः यत् तवायं गर्भः कस्मात् ॥ 8 साच प्रत्युत्तरेण अवोचत् यन्मे स्वरगरो गणः उपरि समाययौ अनेनोक्तं यत् वायोः पवित्रात् गर्भिताऽसि ॥ ॥

9 तदहो पश्येत यत् स्वरगरो गणः ऋते

---

[1] Both om. [2] S indicates ⲙⲡⲉⲩⲙⲁ. [3] JE interlines ⲙ, to agree with S.

[illegible]

तस्याः योषितः केन दृष्टः कस्माच्च सा योषित् सत्या युज्यते परिज्ञातुं ॥ [1][10 चेत् निगदंति यत् तं गणं अदृश्यत्वात् कोऽपि दृष्टुं न शक्नोति ॥] 11 तच्चेत् कारणं अनिरीक्षणस्य तस्य गणस्य अदृश्यरूपित्वं अस्ति इति हेतोः स्माच्च योषित् दृष्टुं न क्षमा ॥ 12 चेत् निगदंति यत् इज्जदः तस्यै योषिते दृश्यतरमकरोत् अनुरूपंच तस्यै योषिते ॥ 13 असौ अन्यस्मै कस्मैचित् अनुरूपं न चक्रे ॥ 14 इदंच यत् सा योषित् सत्यमुवाचेति प्रकटता कस्मात् ॥ 15 अथ चेत् सा योषित् सत्यतया प्रकटाभूत् ततः अन्येभ्यः केभ्यश्चित् निदर्शयितुं युज्यते यथा तेषां तस्मात् साक्षित्वात् अधिकतरं सत्यतरा परिज्ञाता भवेत् ॥ 16 अस्य ननु केवलं तस्यैव योषिते निदर्शनं कोऽपि सत्येन न दधौ ॥ 17 ननु इदंच पश्येत यत् मूलं यत्रेषां दीनेः सकलमपि श्रुतस्मात् साक्षित्वात् योषितः एकस्याः समाययौ यत् इयं उपरि आत्मनि ददौ ॥ ॥

---

[1] JJ omits the passages in brackets, by mistake. [2] Both om. [3] JE om.

18 द्वितीयंच यच्चेत् मशिआकं वायोः पवित्रात् इआजदस्य समुद्भूतं निगदंति तच्चेत् केवलं वायुः पवित्रो यः इआजदात् स एकोऽस्ति तदपरे वायवो ये ऋते तस्मात् न इआजदात् न पवित्राः ॥ 19 अन्यश्चारचयिता प्रकटायते अनुमाननैव ॥ 20 चेत् वायवः सर्व्वे इआजदात् इआजदीयाः संति सर्व्वैरपि पवित्रैः संयुज्यते भवितुं ॥ 21 चेत् केवलं स एको वायुः पवित्रः अपरे वायवो मलिनाः न इआजदीयाः ॥ 22 यथा विना इआजदेन कोऽपि आरचयिता नास्ति तत् मलिनत्वं अपवित्रत्वं यत् अपरेषां वायूनां सर्व्वं इआजदात् ॥ 23 चेत् अपरे वायवः तेऽपि इआजदस्य इआजदीयाः संति सर्व्वैरपि पवित्रैः संयुज्यते भवितुं ॥ 24 ननु तमेकं पवित्रतया दधौ अपरेच मलिना बभूवुः किमिति ॥ ॥

25 द्वितीयंच इदं यच्चेत मशिआकः पुत्रः इआजदस्य अभूत् तेन हेतुना यत् इआजदः पिता सर्व्वेषां दातृतया आरचनतया पालनतयाच ॥ 26 ततो

---

[1] JE om.

मशिआकः पुत्ततया इअजदस्य न विभिन्नो लघुतरायाः अपि सृष्टेः या इअजदेन दत्ता आरचिताच ॥ 27 चेत् शस्त्रत्वात् नरीयात् नारीयात् समुत्पन्नः ॥ 28 तच्चेत् उपरि इअजदे जननिः नरत्वात् नारीत्वात् अनुरूपायते ततश्च उपरि अमराणां गुरूणां अदृश्यानां इत्येवं जननेजीतायाः मरणस्यच संभूतिरनुरूपायते ॥ 29 एवंच उपरि सर्व्वं इअजदे भवितुं नहि संदेहः ॥ 30 यतस्तत यत[3] जननिस्तेन प्रकारेण खाद्यं खादनं मरणंच निःसंदिग्धं ॥ ॥

31 अस्ति यत् कश्चिच वक्ति यत् मशिआकः स्वयं इअजदोऽस्ति ॥ 32 ननु इदं अद्भुततरं यत् इअजदो यो महान् उभयोर्भुवनयोः धाता पालयिता रूपेण मानुषीयेण समुद्बभूव उदरेच योषितः जुहूदायाः ययौ ॥ 33 राज्यं स्थानं आकाशं जगतीं चक्रंच अपरंच सर्व्वं प्रवृत्तिकारित्वात् रक्षणत्वात् समुत्सृज्य प्रच्छन्नतया मलिने विषमे स्याने निपपात ॥ 34 निदानेच निजां तनुं निरसनाय शूलावेशनाय हस्ते

[1] Both [illegible]. [2] JE has [illegible] interlined by later hand. [3] JE om.

दुष्टमनसां संपादयामास ॥ 35 यावत् ते क्रृते मृत्योः प्रभूतां कष्टतां अनाचारतां उपरि समारचयत् ॥ 36 यदिचांतः उदरे योषितः समुद्भवूव तेन हेतुना निगदंति यत् इञ्जदः सर्व्वेषु स्थानेषु अस्ति ॥ 37 तत् सर्व्वेषु स्थानेषु सत्ता अंतः उदरे तस्याः याषितः न विभिन्ना मलिनतमात् दुर्गंधितमात् स्थानात् ॥ 38 समं तेन यत् सर्व्वेषु स्थानेषु स्वता इञ्जदस्य बभूवेति वक्तुं कुत्सितत्वं[3] भूरितरं ॥ 39 यतश्चेत् इत्येवं ततः किंचिदपि क्रृते इञ्जदात् अस्ति इति ब्रुवंति अनृतं ॥ ॥

40 द्वितीयंच तत् यत् निगदंति यत् मरणं शूलावेशनंच शवोत्थानं मनुष्याणां निदर्शयितुं असौ प्रत्यकरोत् ॥ 41 तच्चेत् शवोत्थानं मनुष्याणां निदर्शयितुं विना तेन रज्जुबंधेन मरणेन कष्टेन निजेन अन्यथा न शक्तोऽभूत् तदसौ सर्व्वशक्तेः अननुरूपं ॥ 42 अथ चेत् कोऽपि प्रतिपक्षः प्रतिघाती नाभूत् ततो मनुष्यान् किमिति एवं निर्म्मल-

[1] JE om. [2] JJ [illegible]. [3] Both कुत्सितं.

ज्ञानिनः शवोत्थाननिरीक्षणे निःसंदिग्धान् न चकार यथा अस्य निहीनत्वं अमुना प्रकारेण कष्टतया रज्जुबंधनतया हानितया दुष्टमनसां कामतया निदर्शयनं न संभूतमभूत् ॥ 43 चेत् तं मृतुं नूतनप्रकारतायै निजेन कामेन असौ प्रत्यकरोत् ॥ 44 ततो ननु निंदया शापेनच अवघातकेषु[3] आकारणं तेषां जुहूदानांच क्रोधेन धारणं निःकारणं ॥ 45 नच शापं निंदांच उपरि तेषां कर्तुं किंतु तेषां तेन कर्म्मणा प्रसाददानवद्भिः युज्यते भवितुं ॥ ॥

46 द्वितीयंच इदं यत् निगदंति यत् पिता पुत्रश्च वायुश्च पवित्रः त्रीणि नामानि अन्योन्यस्मान्न विभिन्नानि ॥ 47 न पूर्व्वमेकमपि ॥ 48 इदंच यच्चेत् पुत्रो न लघुः पितुः सर्व्वज्ञातया तुल्यः पिता ततो ननु नाम्ना विभिन्नेन आकारणं किमिति ॥ 49 चेत् त्रयः एकः शक्नोति भवितुं ततः त्रयो भवितुं नव नवच त्रयो भवितुं शक्नुवंतीति निर्व्विकल्पमेव ॥ 50 अपराच गणना

---

[1] JJ omits the words in brackets, which JE inserts in margin without ৩ and ১, but see S and § 59. [2] JJ ১৩৫. [3] Elsewhere both have অপ for অব, see §§ 63, 64, 83.

अनेन प्रकारेण निर्म्मर्यादतया शक्यते वक्तुं ॥ 51 इदंच यच्चेत् पुत्रो न लघुः पितुः तत् पिताच पुत्रात् न महान् ॥ 52 तच्चेत् पिता पुत्रात् अथवा पुत्रो न पितुः उन्नीयते अधिकरोतिच ॥ 53 इदं निःसंदिग्धमेव यत् सर्व्वं एतस्मात्तस्मात् यस्य अस्येति यत् स्वमातुर्बीजं लघु शक्नोति भवितुं ॥ 54 यदि कालेन यदिवान्वयेन ॥ 55 चेत् पुत्रो न लघुः पितुः तत्कर्त्तीच कृतात् नादिर्न महान् ॥ 56 द्वावपि मूलास्पदं शक्नुतः भवितुं ॥ 57 सृष्टिश्च स्रष्टुर्न लघ्वी स्रष्टाच सृष्टेर्न महान् ॥ 58 सर्व्वं यथा उन्नीयते उपमर्यादितरं ॥ 59 इदंच यच्चेत् पुत्रः सकलेन ज्ञानेन तुल्यः पिता तत् पिताच एवं अज्ञानी यथा पुत्रो यो मरणात् शूलावेशनाच स्वीयात् अवेत्ता बभूव ॥ 60 यावत्तैर्विधृत्य निकृष्टेन मृत्युना कष्टतयाच निबंध्य निहतः ॥ 61 न विज्ञातवान् तेन यतस्तैः एतस्मात्

[1] Both ৩৸৳. [2] ?J ১.

पृष्टं यत् दिनं उत्थानस्य कदा असौ प्रत्यवोचत् यत् इदं न कोऽपि वेत्ति विना पित्रा ॥ 62 यथा किल पुत्रोऽज्ञानत्वेन सुनिश्चितः पिताच तथैव ॥ ॥

63 इदंच यदसौ समग्रां सृष्टिं दातिंच आत्मनिच प्रतिघातं न कस्माच्चित् आरचत्[5] ददौच अपघातकांश्च[6] यान् अस्य पुत्रं विनाशितवतः[7] ॥ 64 चेत् इञ्जदोऽपघातकान् यानस्य पुत्रस्य आत्मनिच प्रतिघातं निरधैकं निष्कारणं स्वयं ददौ ॥ 65 तेच पुत्रं सर्वज्ञानतया अस्य निजमुः ॥ 66 तन्ननु निःसंदिग्धं युज्यते भवितुं यत् अपहंता योऽस्य पुत्रस्य स्वयं बभूव ॥ 67 चेत् विवेद यत् पुत्रं यदि संसृजामि ततो हनिष्यंति निदानेच असृजत् ग्रहिलतरोऽज्ञानतरश्च ॥ 68 चेत् न विवेद किंचिज्ज्ञतरः ॥ 69 द्वितीयंच इदं यच्चेत् इञ्जदः एनां सृष्टिं दातिंच न

---

[1] JJ om. [2] JE om. [3] JE has ✱७६८ interlined by a later hand to agree with his misreading of S. [4] Ends with ८ in both, but see S. [5] So both; see ch. xi, 51. [6] JE has श्च, and JJ स्व, for श्च; hence the later hand has understood अपघातकान् स्वीयान्. [7] Doubtful; both have निनासितवनूः.

कस्माच्चित् आरचत्[5] असौ प्रतिघातंच सर्व्वं न कस्माच्चित् आरचत्[5] ददौच तत्रेषां रत्नंरत्नं युज्यते भवितुं ॥ 70 ननु किमिति प्रतिघातं एवं नाशोधयत् यथा अपरां सृष्टिं ॥ ॥

71 अन्यच्च उपरि अनिबद्धत्वे यत्रेषां वाचः आचार्यनिबंधेभ्यश्च ॥ 72 तच्च यत् निगदति यत् न निपतति न किंचित् वृक्षात् न भवेदाधोधो नगरे न द्वौ विहंगौ अन्योन्यं युध्यतः विना आदेशेन पितुः ॥ 73 यो निदर्शयिता अस्ति अस्याः वाचः यत् मूलास्मदं एकं अस्य सर्व्वं कामेन ॥ 74 ननु मशिआकः योऽस्य पुत्रः केन कार्येण विनिर्म्मितः असौ कं मार्गं निदर्शयितुं यमस्य न कामः ॥ 75 चेत् सर्व्वं कामः असौ किमपि अकामि नावोचत् ॥ 76 इदंच सर्व्वस्मात् विचारात् यत् जुहूदाः मशिआकं यमस्य पुत्रं कामेन पितुः निजमुः ॥ ॥

77 द्वितीयंच अनिबद्धतया उपरि स्वतंत्रकामत्वे

---

[1] So both and S; but ... is better. [2] JE om. [3] Both om. [4] S om.
[5] So both; see ch. xi, 51.

प्रवीणतरं निगदति ॥ 78 यत् मनुष्याः स्वतंत्रकामाः दत्ताः संति ॥ 79 एवं दोषाः पापानां यान् मनुष्याः कुर्व्वंति स्वतंत्रकामीयाः संति ॥ 80 असौ स्वतंत्रकामत्वं स्वयं मनुष्येभ्यो ददौ ॥ 81 तत् सर्व्वत्र एनं पापकारिणं युज्यते परिज्ञातुं यो मूलकारणं पापस्य ॥ 82 चेत् मनुष्याः पापं दोषं स्वतंत्रकामत्वेन निजेन कुर्व्वंति न कामेन इञ्जदस्य ॥ 83 तद्व्याघ्र्यालविरूमत्कुणादिक्षुद्रजंतवो ये दंशकाः अपघातका रूपकर्म्माणः पापं दोषञ्च यत्तेभ्यः सदैव प्रभवति केन स्वतंत्रकामत्वेन कस्यच पापं ॥ 84 एवंच विषस्य यत् अपहंतृणो[4] यदंतर्विषवृक्षे अपरेपुच वनस्पतिजातिषु यत्तेषां न स्वतंत्रकामत्वात् कारणं कस्य मूले दधौ ॥ 85 चेत् निगदंति यत् तत् विषं प्रभूतानां औषधेन रोगिणां रोगस्खलयितृ लाभवत् अभीष्टंच ॥ 86 तदहो पृच्छेत यत् स्वयं मांद्यं हानिंच अस्य को

---

[1] JE om. [2] JE has interlined here by a later hand. [3] Both .

[4] Both omit णो.

ददौ तस्यच का अभीप्सा ॥ 87 यस्य पश्चात् अनेन औषधं विषं यत् अपहंतृ समारचितमभीप्सितं ॥ 88 अथवा तत् मांद्यं चेत् अपनेतुं अमृतौषधं दत्तमासिष्यत अनुरूपितरमभविष्यत् विषौषधात् ॥ 89 इदंच यत् स्वयं नाम हानिकारितेति कस्मात् मूलात् कस्याश्च लाभवत्कार्यतायाः प्रत्यभिमुखं अभीप्सा ॥ 90 उपरि एतस्मिन् संबंधे बाहुल्येन शक्यते वक्तुं संक्षेपत्वे निदर्शितं ॥ ॥

91 अन्यच्च वाक्यात् पावरोशस्य यस्तेषामाचार्यः ॥ 92 तत्[1] यत् तेषां निजे मूले अनिबद्धं इदं[2] निगदंति ॥ 93 यत् न पुण्यं यत् कामयामि विना पापेन ॥ 94 यत् न कामयामि करोमि ॥ 95 नाहं करोमि किंतु स कुरुते योऽन्तर्मे उदरे आस्ते ॥ 96 यतः सदैव पश्यामि यन्मे अहश्च रात्रिश्च समं युद्धेन ॥ ॥

97 द्वितीयंच वाक्यात् मशिआकस्य निगदंति यत् इआजदो मूलास्यदं रोचिषः उत्तमतायाश्च ॥ 98 निकृष्टत्वं

---

[1] Both यत्. [2] Both एदं.

तमिस्रंच एतस्मात् पृथक् ॥ 99 इदंच यत् यथा पशुपाता यः पशूनां शतैकस्यांतः रक्षां कुरुते ॥ 100 एकं तस्मात् दुष्टश्वापदाः अपहरंति ॥ 101 पश्चाच्च तस्यैकस्य धावति दुष्टश्वापदापहृतस्य यावत् व्यावृत्य यूथे समानयति ॥ 102 असौ तान् नवतिनव वने विमुंचति ॥ 103 एवंचाहम-नुग्रहीतुं व्यामुग्धानामागतोऽस्मि नच सत्यानां ॥ 104 यतोऽसौ यः सत्यो मार्गे समानयतामनावा-धकः ॥ 105 चेत्[3] मूलास्पदं एकोऽस्य सर्व्वे कामः तत् मूलास्पदं[3] कोऽपि न अपमार्गेण व्यामुग्धः ॥ 106 दुष्टश्वापदेन पशुनिर्हिंशनंच[4] सर्व्वमस्य कामः ॥ 107 असौ दुष्टश्वापदं स्वयमारचत्[5] ॥ ॥

108 वाक् मशिश्चाकस्य प्रभूतानिबद्धतया उपरि द्वयोर्मूलास्पदयोर्निदर्शयित्री ॥ 109 यथा निगदंति सर्व्वस्मात् वचसो मशिश्चाकस्य इदमेव एकं यत् अस्ति अन्यो[3] मूलास्पदं शत्रुश्च मत् पितुः अहमस्य इज्यजदस्य

---

[1] Both ...... [2] Both ...... [3] So both. [4] Both दुष्टश्वापदो पशुनिदर्शनंच. [5] So both; see ch. xi, 51.

पुण्यकरस्यास्मि ॥ 110 एतस्मात् वाक्यात् स्फुटमेव यत् निजं पितरं एतस्मात् शत्रोः विविनक्ति पृथक् कुरुते ॥ 111 इदंच यत् इब्रजदेन सत्यत्वे सत्यतयाच विनिर्म्मितोऽहं ॥ 112 मां आहर्म्मनः पातककरो व्यत्ययितुं समागतः ॥ 113 अनेनच बहुप्रकारतया प्रतारयितुं समीहितोऽहं ॥ 114 ननु चेत् मूलास्पदं एकोऽस्य कोऽपि प्रतिपक्षो नास्ति आहर्म्मनः किमिति एवं समर्थो यत् पुत्रं इब्रजदस्य समीहे व्यामोहयितुं ॥ 115 चेत् स्वयं इब्रजदो ददौ तं पाताककरं ततस्तत् व्यामोहनकरणं[3] ज्ञानेन कामेन निजेन ॥ 116 व्यामोहकर्त्तांच पुत्रस्य सर्व्वथा स्वयं ॥ ॥

117 इदंचोज्जिरति यत् यदि जुहूदाः प्रत्यभिमुखं संवादं संतस्युः ततो जुहूदान् जगाद यत् यूयं एतस्मात् अधश्चरात् अहं ऊर्ध्वचरादस्मि ॥ 118 यूयं एतस्मात् नगरात् स्थ[4] अहं न तस्माद्-

---

[1] Both om. [2] JJ om. [3] Both have ना for न. Always आस्य in both.

[illegible]

स्मि ॥ 119 असौ इदंच जगाद किल जानामि यत् यूयं बीजात् अब्राहीमस्य स्य[2] स यः आदितो मनुष्यहंता बभूव ॥ 120 मांच समीहे निहंतुं ॥ 121 अहं तदेव[3] विदधामि यन्मे पिता ददर्श यूयं तनु कुरुथ यत् युष्माकं निजेन पित्रा दृष्टं ॥ 122 इदंच यच्चेत् इश्वजदोऽस्ति स पिता यो युष्माकं तत् यूयं मन्मित्राः स्थ ॥ 123 इति हेतोः यतोऽहं इश्वजदात् समुद्गतोऽस्मि नच निजकामादागतोऽस्मि ॥ 124 अनेन इश्वजदेन पुण्यकरेण विनिर्म्मितोऽस्मि तत् यूयं किमिति वाक्यं मे न शृणुथ ॥ 125 किंतु इति हेतोः यतः पापकरात् स्थ तत् यूयं न शक्ताः श्रोतुं ॥ 126 कामंच निजस्य पितुः कामयथ कर्त्तुं ॥ 127 अनेनच सत्यं नोक्तं सञ्चिंच यत् निगदति तदनृतं निगदति इति हेतोः यतोऽलीकाः स्थ निजेन समं पित्रा यूयं ॥ 128 अहं यः सत्यं समुद्गिरामि तन्मे प्रधानं न विधत्थ ॥ 129 सच यः इश्वजदात् वाक्यंच इश्वजदस्य शृणोति

---

[1] अ seems wanting. [2] Always आस्य in both. [3] JE तद्.

यूयं इति हेतोः यतो न इञ्जदात् स्य वाकं मे न शृणुथ ॥ 130 असौ अनया गिरा सर्व्वं तत् यत्[2] न्यदर्शयत् यदस्ति द्वौ मूलास्पदे एको येनाहं विनिर्म्मितः एकश्च येन जुहूदाः ॥ 131 असौ तत्र पुण्यकरं किंतु पातककरमाकारयत् ॥ ॥

132 असौ इदंच निजगाद यत् न क्षमो वृक्षं पुण्यस्य फलंच पापस्य नच तं पापस्य फलंच पुण्यस्य प्रदातुं ॥ 133 इदंच यत् अथवा[3] समग्रं वृक्षं समं फलेन पुण्यस्य कुरुते अथवा समग्रं वृक्षं समं फलेन पापस्य कुरुते ॥ 134 यतः सर्व्वेऽपि वृक्षाः फलात् प्रकटीभवंति यदि पुण्यस्य यदिवा पापस्य ॥ 135 असौ समग्रं वृक्षं जगाद नचाङ्गिं वृक्षं ॥ 136 ननु कथं संभवति अङ्गो वृक्षः तेजसः अङ्गश्च तमसः ॥ 137 अङ्गैः पुण्यस्य अङ्गश्च पापस्य ॥ 138 अङ्गश्च सत्यस्य अङ्गश्च अनृतस्य ॥ 139 यदि इमानि द्वितयानि अन्योन्यं प्रतिद्वंद्वीनि संति ॥ 140 एको वृक्षो भवितुं न शक्नुवंति ॥ ॥

[1] JJ om. ०, JE ०॥. [2] So both [3] JE अथ.

141 असौ द्वितीयंच जुहूदानां सर्प्पीः पर्व्वतीया जुहूदा इत्याकारयत् ॥ 142 तान् उवाच यत् कथं यूयं पुण्यं शक्ताः कर्त्तुं यदि पातककरा जुहूदाः स्य ॥ 143 असौ न निजं पितरं पातककरमाकारयत् ॥ 144 इदंचोङ्गिरति यत् सर्व्वेऽपि वृक्षाः ये पित्रा न[1] उग्राः खनिष्यंते[2] अग्नौच अवकरिष्यंते ॥ 145 यस्य श्रुतस्मात् वाक्यात् शक्यते परिज्ञातुं यत् संति वृक्षाः ये पित्रा न उग्राः खनितुं[2] अवकरितुंच योग्याः ॥ 146 द्वितीयंच इदं यत् स्त्रीयेभ्यः समागतोऽहं स्त्रीयैः न प्रतिकृतोऽहं ॥ 147 यस्मात् शक्यते परिज्ञातुं यत् स्त्रीयत्वं अस्त्रीयत्वंच द्वितयमास्ते ॥ ॥

148 इदंचोङ्गिरति यत् पितर्मे आकाशे ते भूयात् राज्यं तवैवं भूयात् कामो जगत्यां यथा आकाशे ॥ 149 मह्यं देहि अन्नं संततीयं मां मा समुत्सृज संशयत्वे ॥ 150 श्रुतस्मात् वाक्यात् परिस्फुटं यदस्य कामो जगत्यां न श्वं

[1] Both om. [2] Both have ष for ख.

विमलं यथा आकाशे ॥ 151 इदंच यत् संशयत्वं मनुष्याणां न इञ्जदात् ॥ 152 अस्तौ इदंच निजगाद आदौ यत् न तेन आगतोऽस्मि यत् आचारं मूशाकस्य विध्वंशयामि ॥ 153 किंतु तेन आगतोऽस्मि यत् संपूर्णतरं करोमि ॥ 154 अस्य समग्रा वाक् आदेशश्च स यः आचारे ज्ञात्रौच[1] मूशाकस्य विध्वंशयिता प्रतिद्वंद्वीच बभूव ॥ 155 उपरि एतस्मिन् पदे यावत् अत्र परिपूर्णं ॥ ॥

CHAPTER XVI.

1 द्वितीयंच समालेखिष्यते उपरि अशुद्धौ मानेयस्य सहस्रात् दशसहस्रेभ्यश्च एकं ॥ 2 यतोऽशुद्धिं प्रलापंच प्रतारणंच मानेयस्य मानेयीयानांच संपूर्णतया समालिखितुमशक्तोऽहं ॥ 3 अहं क्लेशेन बहुना दिवसैश्च दीर्घैः मध्यं अवाप ॥ ॥

Chapter XVI.

1 द्वितीयंच समालेखिष्यते उपरि अशुद्धौ मानेयस्य सहस्रात् दशसहस्रेभ्यश्च एकं ॥ 2 यतोऽशुद्धिं प्रलापंच प्रतारणंच मानेयस्य मानेयीयानांच संपूर्णतया समालिखितुमशक्तोऽहं ॥ 3 अहं क्लेशेन बहुना दिवसैश्च दीर्घैः मध्यं अवाप ॥ ॥

[1] Doubtful; both ज्ञातौच. Possibly नीतौच.

4 नतु जानीयात माज्दइअत्रा: जरथुस्त्रीया: यत् मूलवाक् मानेयस्य उपरि नि:सीमत्वे मूलास्पदयो: ॥ 5 मध्याच उपरि समाश्लेषे ॥ 6 निर्व्वाणेच उपरि विभक्तित्वे रोचिपस्तमिस्रात् ॥ 7 तत् यत् अविभक्तिकर्तृत्वे बहुप्रतिमतरं ॥ ॥

8 द्वितीयंच इदं यत् पृथ्वी शरीरकृत्रा[3] आहर्म्मनादीनां ॥ 9 शरीरकृत्रा[3] सृष्टि: आहर्म्मनस्य ॥ 10 अस्या: व्यक्तिश्च इयं यत् आकाशं अजिनात् ॥ 11 पृथ्वीच पिशितात् ॥ 12 अद्रयश्च अस्थिभ्य: ॥ 13 वनस्पतयश्च केशेभ्य: कूनीदेवस्य ॥ 14 वृष्टिश्च वीर्यं माजंदरदेवानां ये चक्रपदे निवद्धा: संति ॥ 15 मनुष्या: देवा: द्विपदा: गोपशवश्च चतुष्पदा: ॥ 16 कूनीदेवश्च सैन्याधिपति: आहर्म्मनस्य ॥ 17 यो नखै: प्रथमं संग्रामे रोचिपं होर्म्मिज्दात् दातु: अवालिख्य अगिलत् ॥ 18 तैश्च द्वितीये संग्रामे कूनीदेव: समं बहुभिर्देवै: गृहीत: ॥ 19 अस्तिच यत्

---

[1] Both om. [2] With ⟨⟩ as later marginal gloss in JE. [3] Both have ता for त्रा.

चक्रपदे निवद्य कूनीदेवो निहतः॥ 20 इयं सृष्टिः गुर्व्वी तस्मात् धृता कृताच॥ 21 सूर्यश्चंद्रश्च बहिराकाशे उच्चैस्तरं विनिर्म्मितः॥ 22 यत् यावत् तां रोचिषं देवैर्गिलितां स्तोकस्तोकं आकर्षणेन गालनेन सूर्यचंद्रयोः गालयंति आकर्षंतिच॥ 23 पश्चात् आहर्म्मनः पुरोनिरीक्षणतया विवेद यत् एनां रोचिषं सूर्यचंद्रयोः आकर्षणेन क्षिप्रं गालयिष्यंति विवेजयिष्यंति॥ 24 क्षिप्रं न विभक्तये रोचिषस्तमिस्रात् एनां सृष्टिं लघ्वीं या यथा मनुष्याः गोपशवश्च अपराणि जीवमंति समग्राणि तथैव प्रतिरूपाणि सृष्टेः गुर्व्याः समं अपरया सरिण्या सृष्ट्या समारचत्[1]॥ 25 जीवं रोचिषंच अंतर्वपुषि बबंध गुप्त्यां[2] चिक्षेप॥ 26 यत् यावत् सा रोचिः या सूर्येण चंद्रेण आकृष्यते पुनर्मैथुनेन जननेनच जीवमतां प्रतिस्खल्यते॥ 27 विभक्तिश्च दीर्घतरा भवेत्॥॥

[1] So both; see ch. xi, 51. [2] JJ गात्यां, JE गोत्यां (as both in § 38).

28 वृष्टिश्च वीर्यं माजंदरदेवानां बभूव ॥ 29 तेन हेतुना यत् माजंदरदेवाः चक्रपदे निबद्धाः संति ॥ 30 ये रोचिषं अगिलन् ॥ 31 नवप्रकारतया विवेकतया विचित्रतया कालस्य रोचिषं तेभ्यो विभक्तुं द्वादशराशीः[2] दुहितरः कालस्य उपकंठं माजंदरदेवानां नराकृतीनां निदर्शयंति ॥ 32 यत् यावत् तेषां माजंदरदेवानां दर्शनात् तासां कामः समुदेति ॥ 33 वीर्यंच तेभ्यो विभज्यते ॥ 34 सा रोचिः या अंतर्वीर्यं जगत्यामवकीर्यते ॥ 35 वनस्पतयो वृक्षाः धान्यानिच तेभ्यः समुद्भवंति ॥ 36 रोचियो अंतर्माजंदराणां वीर्येण विभज्यते ॥ 37 साच या अंतर्जगतीषु हेतुना वनस्पतीनां जगतीभ्यो विभज्यते ॥ ॥

38 द्वितीयं उपरि विभिन्नरत्नत्वे जीवस्य तनोश्च इदं यत् जीवः अंतर्वपुषि निबद्धो गुप्त्यां[3] क्षिप्तः ॥ 39 यथा दाता धाताच[4] सर्व्वेषां सृष्टिमतां शरीरिणां[5]

---

[1] Better add ⟨⟩, as in § 25 and S. [2] So both. [3] Both गोत्यां; see § 25.
[4] JJ धत्ताच for धत्तीच. [5] JE सीरिणां.

आहर्म्मनोऽस्ति ॥ 40 इति हेतोर्नै युज्यते जननिं कर्त्तुं अन्वयं प्रचारयितुं ॥ 41 यतः सर्व्वैः सहायि समं आहर्म्मनेनास्ति धातृतया मनुष्याणां गोपशूनां स्खलनकारितयाच जीवस्य रोचिषः संतस्तनूनां नचोप्तव्यानि वनस्पतिधान्यानि ॥ 42 द्वितीयंच[3] अनिवर्त्तनया इदंच निगदंति ॥ 43 यत् मृत्युकर्त्रा सृष्टेः सदैव आहर्म्मनोऽस्ति ॥ 44 इति हेतोर्नै युज्यते कामपि सृष्टिं निहंतुं ॥ 45 यतः आहर्म्मनकर्म्मता अस्ति ॥ ॥

46 द्वितीयंच इदं यत् यथा सृष्टिं आहर्म्मनो दधौ निर्व्वाणे विजयी इत्रजदोऽस्ति ॥ 47 विभक्तिकर्त्तृतया जीवानां तनुभ्यः ॥ 48 इयं पृथ्वी निदाने विलयिष्यति[4] ॥ 49 पुनर्नै आरचयिष्यते ॥ 50 नच भविष्यति शवसम्मार्ज्जनत्वं तनोः अक्षयत्वं ॥ 51 द्वितीयंच इदं यत् तयोर्द्वयोर्मूलास्पदयोः समग्रतया संस्थितिः समसीमतया एवमभूत् यथा आतपस्य छायायाश्च ॥

---

[1] JE inserts ৎ. [2] S indicates ৫০৩. [3] JE omits च. [4] So both.



52 तयोर्नाभूत् किमपि आसनत्वं विश्लेषत्वंच मध्ये ॥ ॥

53 ननु ब्रवीमि आदौ उपरि भवितुं अशक्यं यत् किमपि संतिष्ठमानं किंचित् अमर्यादं ॥ 54 विना केवलं तेन यत् अमर्यादमाघोषयामि रिक्तत्वं कालंच ॥ 55 तेच ये संति अंतः स्थाने कालेच विद्यमानाः पदार्थाः सीमावंतो दृश्यंते ॥ 56 इदंच यत् यदि तयोः एकत्वं द्वित्वंच उपरि समुन्नीयेते तस्मात् यथा एकत्वं विना सर्वप्रवर्त्तनतया कस्यचित् अन्यथा भवितुं न शक्नोति ॥ 57 यतः एकं इदं यत् अद्वितीयं[5] ॥ 58 द्वेच इमे यत् मूलमेकं विभिन्नं अन्योन्यतः ॥ 59 यत् न द्वे आकार्येते ॥ 60 यदि एकं विना सर्वप्रवर्त्तनतया एकत्वस्य न परिज्ञायते ॥ 61 द्वित्वंच विभिन्नत्वेन एकैकस्य न शक्नोति भवितुं ॥ 62 एकं तत् यत् एकत्वेन एकं प्रवीणतरंच एकत्वेन ॥ 63 एकं द्वितयंच अंतर्बीजं

[1] Both om. [2] S indicates [illegible]. [3] Doubtful; S om.
[4] JE om. [5] So both.

कियत्ताया: संख्यामत्तायाश्च ॥ 64 कियत्ताच संख्यामत्ताच समताच विभिन्नताच यथाहं ज्ञवोचं विना सीमामत्तया भवितुं न शक्नोति ॥ 65 मध्येच ज्ञानिनां निर्म्मलतरं ॥ ॥

66 द्वितीयंच इदं यत् नि:सीमत्वं तत् भवति यत् ज्ञानेन न प्रवर्त्तते ॥ 67 यदिच केनापि ज्ञानेन प्रवर्त्तितुं न शक्नोति ज्ञंतर्ज्ञाने इञ्जदस्य प्रवर्त्तितुं न शक्नमनुमानेन ॥ 68 तत् इञ्जदस्य स्वत्वं स्वीयं तच्च यत् तमोमूलास्यदस्य समग्रतया ज्ञंतर्ज्ञाने न प्रवर्त्तते ॥ 69 चेत् ज्ञस्य स्वीयं स्वत्वं ज्ञंतर्निजे ज्ञाने न प्रवर्त्तते तत् विश्वोत्तमो विश्वदर्शीति वदतामनृतं[5] ॥ 70 यत् विश्वं सर्व्वत्वं विभनक्ति ॥ 71 सर्व्वत्वं हि सर्व्वपक्षप्रवर्त्तनत्वात् सर्व्वं समाकार्यते ॥ 72 सर्व्वपक्षप्रवृत्तस्य सीमामत्ता स्वभावेन ॥ 73 तत् इञ्जदश्चेत् सर्व्व-

[1] Both omit, but see S. [2] Both om. [3] Both ꤁ꤢꤵ, but see S. [4] Both ꤌꤢꤵ, but see § 72. [5] JJ चदत्तामनृतं, JE चदतामनृतं; see § 76.

[illegible] [1] [illegible]

[illegible] 74 [illegible] 75 [illegible]

[illegible] [2] [illegible] [3] [illegible]

[illegible] 76 [illegible]

[illegible]

[illegible]

77 [illegible]

[illegible] 78 [illegible]

[illegible]

[illegible]

[illegible]

79 [illegible]

[illegible] 80 [illegible]

[illegible]

[illegible]

[illegible] 81 [illegible]

प्रवर्त्तनत्वात् स्वीयात् वेत्ता सीमामान् संयुज्यते कलयितुं ॥ 74 चेत् निःसीमो न वेत्ता ॥ 75 आदौ ज्ञानं ज्ञानिनोऽस्य सूक्ष्मतरं परिज्ञानं यत् स्वीयस्वतायाः यथास्थतायाः कियत्तायाश्च ॥ 76 यश्च तस्याः स्वीयायाः समग्रायाः स्वतायाः यथास्थतायाः कियत्तायाश्च अवेत्ता उपरिच अपरायाः यथास्थतायाः कियत्तायाश्च ज्ञानी बभूवेति वदतामनृतं[4] ॥ 77 इदंच यत् यथा निःसीमः अप्रवर्त्तनत्वात् ज्ञानेन न प्रवर्त्तते ॥ 78 तत् इदं यदसौ समग्रः स्वयं ज्ञानी किंवा अस्ति अज्ञानः समग्रो रोचिष्मान् किंवा अस्ति तमिस्री समग्रो जीवन् किंवा अस्ति मृतः इदमपि अवेत्ता ॥ ॥

79 द्वितीयंच इदं यत् रोचिषं जीवंच यदत्व[5] अवलोकयामि विभागः सर्व्वकालादस्ति किंवा नो ॥ 80 चेत् विभागः स्वत्वात् कालस्यास्ति तदहो विचारयथ यत् किंचित् यस्मात् विभागं विभक्तुं शक्यते विभागवान् शक्नोति भवितुं ॥ 81 विभागवान् चेत्

---

[1] Both om. [2] Both [illegible] [3] Both insert ·, but see S. [4] JJ चवक्तामनृतं, JE चदतामनृतं; see § 69. [5] Both यदच.

सम्मिलितः[3] अन्यथा नाधिकरोति ॥ 82 सम्मिलितश्च ऋते मेलयितुः येन स सम्मिलितो मिलितः अन्यथा न संवदति ॥ 83 चेत् विभागः खंडं सीमावान्[4] अवलोक्यते मूलेनापि यस्मात् विभागः अमुना प्रकारेण खंडेन सीमावता भवितव्यं नहिसंदेहः[5] ॥ 84 तेन यतो निगदंति यत् सर्व्वेऽपि फलभागाः मूले साक्ष्यदातारः ॥ 85 तच्चेत् विभागं खंडं सीमावंतं पश्यामि तत् मूलमपि चेत् खंडं विभागेभ्यः सम्मिलितं सीमावत् अन्यथा भवितुं न शक्नोति ॥ 86 इदंच यत् निःसीमो न विभज्यते ॥ 87 यतो विभागः समवायात् विभज्यते ॥ 88 समवायश्च उपरि सीमासत्तायां साक्षी ॥ 89 यथाहं उपरि न्यदर्शयं ॥ 90 यत् सत्तां यथास्थतांच मूलस्य ऋते उपमानात् प्रतिरूपाच्च फलस्य अन्यथा नावलोकयामि ॥ 91 सर्व्वं किंचित् फलेनावलोक्यते ॥ 92 मूलेनापि अमुना प्रकारेण भवितव्यमेव ॥ 93 तच्चेत् खंडत्वं सीमासत्त्वंच

---

[1] In § 64. [2] Both ‹ · · ›. [3] Both have always सन् for सम् in this word.
[4] So both. [5] JJ नहिसंदेहं.

फलेन दृश्यतरं सर्व्वस्मात् विचारात् मूलमपि यस्मात् फलं सीमामत्रया निःसंदिग्धं ॥ ॥

94 द्वितीयंच इदं यत् निःसीमः स भवति योऽपरिरेपितस्थानो[4]ऽमर्यादस्वरूपः ॥ 95 अस्य अन्यत् स्थानं आसनंच अस्य परिरेषणे[5] नास्ति ॥ 96 तच्चेत् द्वौ मूलास्मदीयौ निःसीमौ अमर्यादस्वरूपौ उच्यते आकाशपृथ्वीप्रभृतीनि तनुकृतानि वर्द्धिष्णूनि जीवाश्च रोचिषश्च दातारश्च अमराः गुरुतराः प्रचुराः सहसंचाराः येषां विभिन्ननामत्वं विभिन्नत्वात् एकैकस्य अन्योन्यतो न सीमामंतः शक्नुवंति भवितुं ॥ 97 तत् सर्व्वं अंतः कस्य कुत्रच ददौ ॥ 98 चेत् द्वौ मूलास्मदीयौ सर्व्वकालं अपरिरेपितस्थानौ बभूवतुः ॥ 99 चेत् तौ स्वतां निःसीमां सीमावतींच चक्रतुः स्थानंच[6] इदं सर्व्वेषां वर्त्तमानानां भूतानां भविष्याणां चक्रतुः भवितुं कथं शक्नोति ॥ 100 चेत् रत्नं यत् सदैव निःसीमं

---

[1] JJ ; perhaps for or , see S and § 96. [2] Both .

[3] Both omit . [4] रेषित and its cognates, both here and in §§ 95, 98, 102, are evidently intended to be derivatives from रिष्.

[5] Or परिरेषा; both have परिरेषान.

[6] JE omits च.

सीमावत् भवितुं शक्नोति तत् नास्तिच भवितुं शक्नोत्येव ॥ 101 तत् यत् उपरि अपरिवृत्तौ रत्नस्योद्गिरंति अनृतं ॥ ॥

102 इदंच अहो ज्ञानीयात यत् निःसीमः स भवति यस्मात् परिरेषा[7] पूर्व्वं न विभक्ता ॥ 103 किंचिदपि वस्तु ऋते तस्मात् पृथक् तस्मात् भवितुं न शक्नोति ॥ 104 ऋते सीमायाः निःसीमत्वस्य न परिज्ञायते ॥ 105 अथवा स्वभतया तत् किंचित् यत्[6] न वेत्ति यत् किं सदैवोद्गिरति युध्यति वचश्च उपरि प्रचारयति लघून् लघुज्ञानिनः तं प्रति विमोहितमार्गं कस्मै ॥ 106 यदिच जडतया इदंचोद्गिरति यदसौ स्वयं निःसीमः अस्य ज्ञानंच निःसीमं निःसीमज्ञानतया वेत्ति यत् निःसीमोऽस्ति ॥ 107 तत् अनृतं द्विवारंच अनृतं ॥ 108 एकंच इदं यत् ज्ञानं उपरि कस्यचित् तस्य यत्

---

[1] Both omit, but see S. [2] So both, but S indicates final ಕ್ಕ–. [3] So JJ; JE has a blank space, thus ಸಂ . . . Better ಸಂಪೂರ್ಣ, or ಸಂಪೂರ್ಣಂ. [4] So both; S indicates ೨. [5] Both insert ಪ್ರ, which S omits; if inserted it obliges us to read ಕೃಷ್ಣ as a single word. [6] JE om. [7] See note to § 94.







ज्ञानेन अवलोकितं अंतर्ज्ञानेच प्रवर्त्तितं ॥ 109 किंचिदपि विना तत् यदंतर्ज्ञाने समग्राय[2] प्रवर्त्तितं दृष्टंच अन्यथा संपूर्णं[3] न परिज्ञायते ॥ 110 कस्यचित् पदार्थस्य परिज्ञानं समग्रावलोकनेन पदार्थस्य भवति ॥ 111 समग्रावलोकनंच पदार्थस्य समग्राप्रवृत्त्याच पदार्थस्य अंतर्ज्ञाने भवति[4] ॥

---

[1] Better . [2] Both समग्राये. [3] JE has संति and omits the rest of the section, as if its original were illegible. [4] Both भवितुं. JJ and JE both break off at this point, without concluding the subject; and no other MS. has yet been discovered that extends farther. The quantity of text that has been lost is probably small, for, if we suppose that the old MS. AK was originally complete, and was divided into two equal portions in consequence of some division of family property, as the portion extant ends with ch. xi, 145, the missing portion could hardly have extended more than two pages further than the text is printed in this edition. The additional MS., described in the Introduction as AK2, which was not available till half of the Pâzand text was in type, and is now supposed to be the MS. of 1569, also breaks off at the same point as JJ and JE.

SHIKAND-GÛMÂNÎK VIJÂR.

THE PAHLAVI TEXT,

CHAPTERS I–V.

OBSERVATIONS.

1. The Pahlavi manuscripts of this work rarely extend beyond these first five chapters. The few exceptions, known to the editors, are mentioned at the end of the text. But, as the Pahlavi version, now extant, is evidently a mere reproduction from the Pâzand, it seems unnecessary to print more than its usual extent. For the same reason, many trifling variations in the manuscripts are left unnoticed, and the Pahlavi orthography is freely corrected to agree with that in general use.

2. In the text, the chapters and sections are made to correspond with those of the Pâzand version, and the words are divided as usual in the manuscripts, the conjunction *va* and relative *î* being not separated from the words to which they belong. But, in the transliteration, hyphens are used, both for connecting the components of compound terms, and for dividing words into their component parts.

3. The meaning of the italics and apostrophes in the transliteration is as follows:—*a*, *â*, *h*, *kh* are used where one turn of the Pahlavi letter is omitted, as in 𐭥 for 𐭠𐭥 or 𐭧𐭥, and 𐭪 for 𐭪𐭠; *c* has the sound of ch in 'church;' *d* is used when its sound is represented by 𐭣; *j* when written 𐭩; *l*, *r* when written 𐭫 or 𐭬; *v* when written 𐭥; *z* when written 𐭧 or 𐭦; *zd* when written 𐭤; dî*p*, s*p*, sa*j*, si*c*, si*j* when written 𐭩𐭩, for 𐭠𐭩 or 𐭧𐭩; *êc*, *êj*, *êz*, g*ac*, g*aj*, g*uj*, y*ez* when written 𐭥, for 𐭧𐭭; r*aj*, r'j, r'*z* when written 𐭮, for 𐭧𐭮; and *îh* indicates the correction of an erroneous îk.

4. The manuscripts mentioned in the foot-notes are fully described in the Introduction. Their extent, age, and relative importance (so far as their Pahlavi text is concerned) are as follows:—

K28 (about 150 years old) I, 1—II, 8; III, 1–25; III, 36—IV, 106; &c.
PA18 (more than a century old) I, 4—V, 95.
L15 (written about A.D. 1737) I, 4—IV, 39; IV, 41—V, 71.
R (more than 50 years old) I, 28—V, 61.
X (perhaps the same age) I, 1–32; I, 34—III, 11; III, 13—IV, 8; IV, 10–48, 50–70, 72–100; &c.
AK (probably four centuries old) V, 6, 7, 9–28, 34, 35, 81, 95; &c.
Bm (perhaps 50 years old) I, 1–31.

Other manuscripts were originally collated at Poona, but hardly any particulars about them have been preserved.

SHIKAND-GÛMÂNÎK VIJÂR.

CHAPTER I.



Chapter I.

1 Pavan shem-î Aûharmazd, khvadâî-î mahîst va-dânâk, vîsp-khvadâî, vîsp-âkâs, va-vîsp-tûbânŏ, (2) mûn dên-ic maînôgânŏ maînôg. 3 *A*fash min benafshman*îh*-î aêvak pavan aêvak*îh* aûstîgânŏ *â*frî*d*anŏ. 4 *A*fash yehabûn*d*, pavan nafshman anahambu*d*îk zôhar, *av*artar *h*aft ameshôspend, va-vîspânŏ ya*zd*ânŏ-î maînôgânŏ stihânŏ, (5) va 7 stih dakhshakân-î hômand mar*d*ûm, gôspend, âtâsh, ayôkshûst, zamîk, mayâ, aûrvar. 6 *A*fash yehabûn*d* mar*d*ûm pavan

[1] All om. [2] All , by confusing Pz. with . [3] All . The misuse of for is nearly constant in the MSS., and is corrected, without further notice, wherever italic -*îh* is given as the reading of . [4] Bm , which seems better. [5] All have for . Several of the Pl. MSS. in India omit from to this point, and two of them substitute the following modern passage :—



. [6] Better (va-vîsp âyin); PA18, L15 begin with this word. [7] All but L15 have .

sardârîh-î dâmânŏ ghal kâm rûbâkîn. 7 *A*fash shedrund [16], hangâm hangâm pavan khvêsh khváparíh, avôkhshâyishnkarîh ghal nafshmanânŏ dâmânŏ, va-dênô, va-dânâkîh-î avézakîh gûmézakîh citarîk kâmîh. 8 Aêtûnŏ-c vîr, hûsh, khirad, dânishnŏ, bôd, fravâhar-î hômand rûbânŏ afzârân-î hômand âkâsîh khvâstâr-î denman afzârân-î maînôg, panj-î hômand vênishnŏ, shinvishnŏ, anbôîshnŏ, câshishnŏ, padarmâyishnŏ, (9) pavan panj afzârân-î stih-î hômand cashm, gôsh, vînîk, pûmman, hamâk tanû mâlidârânŏ; (10) afash pavan denman afzârânŏ avâkîh anshûtâ yehabûnd, ghal râyînîdârîh-î dâmânŏ.

11 *A*fash yehabûnd dênô-î harvist-âkâsîh mahîst dirakht hûmânâk, (12) mûnash aêvak stûnak, 2 vakhshishnŏ, telatâ azag, cahâr shâk, panj barg-gâs. 13 *A*fash aêvak stûnak padmânŏ. 14 Trên vakhshishnŏ

---

[1] All but X have ـه for ـو. [2] All but L15 have ـاىغ. [3] So K28, L15, X, Bm; others ـاس (avŏ). [4] Better ـاىر (âyinŏ) for ـاس. [5] K28, X, Bm prefix ا (va). [6] All ـەـىلەو. [7] L15 omits ـم; better ـاىـەـمـەـىـەـد (pîrmâsishnŏ). [8] Better ـاىـەـلـىـەـد (mâlidârânŏ). [9] All ـاىغ. [10] So K28, X; others ـەـىـلـ. [11] K28, X, Bm ـەا. [12] So K28, X, Bm; others begin with ا. [13] Nêr. misread 'dêshak.' [14] All have ـ for ـو; Nêr. misread 'brîshak.' [15] L15 ـاىغ. [16] Better than '*a*jash yâtûnd' which Nêr. seems to have understood.

kûnishnŏ va-pâhrêjishnŏ. 15 3 azag hûmatô, hûkhtô, hûvarshtô-î aît hû-mînishnîh, hû-gôbishnîh, hû-kûnishnîh. 16 Arbâ shâk *c*ahâr pîshakân-î dênô mûnash dênô gêhânŏ pa*d*ash vîrâyî-aît, (17) î aît âsrûk*îh*, aratêshtâr*îh*, vâstryôsh*îh*, hû-tûkhsh*îh*. 18 Panj barg-gâs khômshyâ patânŏ zyashânŏ dênôîk shem mânpat, vîspat, zandpat, matâpat, zaratûhasht*r*atûm. 19 Va-aêvak rôêshmanân sar-î aît malkâân malkâ, dahyûpat-î gêhânŏ. 20 *A*fash dên gêhânŏ kar*d*ak-î aît mar*d*ûm pê*d*ûkînî*d* pavan hûmânâk*îh*-î denman *c*ahâr pîshakân-î gêhânŏ. 21 *C*îgûn madam rôêshman âsrûk*îh*, (22) madam yedman aratêshtâr*îh*, (23) madam ashkambŏ vâstryôsh*îh*, (24) madam rigelman hû-tûkhsh*îh*. 25 Aêtûnŏ-*c* *c*ahâr hûnarân-î dên mar*d*ûm-î aît khîm, hûnar, khira*d*, tûkhshâk*îh*, (26) madam khîm âsrûk*îh*, *c*îgûn mahîst khvêshkârîh-î âsrûkân khîm-î sharm va-bîm râî vinâs lâ vadîdûnd, (27) madam hûnar aratêshtâr*îh*-î aît vâspûharakântar

---

[1] All have ۱ for ۏ. [2] K28, X, Bm prefix ۱ (va). [3] L15 has ۱۱۱۱ for ۱۱۱۱. [4] All omit ۰. [5] K28, L15, X, Bm prefix ۱ (va). [6] All but L15, X have ۰ for the latter ۏ. [7] K28, X have ۱ (va) for ۰. [8] All have always ۱۱۱۱ for ۱۱۱۱.

pîrâyishnŏ-î aratêshtârân hûnar-î vijârî-aît, zeka*rîh*-î min benafshman*îh*, (28) madam vâstryôshân khira*d*-î· aît âr*d*îk-kâr*îh*-î var'*zîd*anŏ-î gêhânŏ, pa*d*vastanŏ-î gha*l* frashaka*rd*, (29) madam hû-tûkhshân tûkhshâk*îh*-î aît mahîst rûbâkînî*d*âr*îh* zyashânŏ pîshak. 30 Denman ko*l*â âyûînak nîvârishnŏ madam aêvak stûnak, râst*îh* va-pa*d*mânŏ, pa*d*îrak drûj *a*fash *a*fzârân-î hambu*d*îk hômand.

